नमो नमो निम्मल दंसणस्स



# आगमसुत्ताणि

## (सटीकं)

भागः - १४

: संशोधक सम्पादकश्च :

## मुनि दीपरत्नसागर

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बालब्रह्मचारी श्री नेमिनाथाय नमः

नमो नमो निम्मल दंसणस्स

श्री आनंद-क्षमा-ललित-सुशील-सुधर्मसागर गुरूभ्योनमः

# आगम सुत्ताणि (सटीकं)

## भागः-१४

निरयावलिकाउपाङ्गसूत्रं, कल्पवतंसिकाउपाङ्गसूत्रं, पुष्पिकाउपाङ्गसूत्रं, पुष्पचूलिकाउपाङ्गसूत्रं, वृष्णिदशाउपाङ्गसूत्रं

चतुःशरणप्रकीर्णकसूत्रं, आतुरप्रत्याख्यानप्रकीर्णकसूत्रं,
महाप्रत्याख्यानप्रकीर्णकसूत्रं, भक्तपरिज्ञा प्रकीर्णकसूत्रं
तंदुलवैचारिकप्रकीर्णकसूत्रं, संस्तारकप्रकीर्णकसूत्रं
गच्छाचारप्रकीर्णकसूत्रं, गणिविद्याप्रकीर्णकसूत्रं
देवेन्द्रस्तवप्रकीर्णकसूत्रं, मरणसमाधिप्रकीर्णकसूत्रं

-: संशोधकः सम्पादकश्चः :-

## मुनि दीपरत्नसागर

ता. १४/४/२००० रविवार २०५६ चैत्र सुद ११

४५- आगम सुत्ताणि-सटीकं

मूल्य रू.११०००/-

卐 आगम श्रुत प्रकाशन 卐

: संपर्क स्थल :

''आगम आराधना केन्द्र'' शीतलनाथ सोसायटी विभाग-१,
फ्लेट नं-१३, ४-थी मंझिल, व्हायसेन्टर, खानपुर,
अहमदाबाद (गुजरात)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## आगमाः-१९.....३३ विषयानुक्रमः


| मूलाङ्कः | विषयः | पृष्ठाङ्कः | मूलाङ्कः | विषयः | पृष्ठाङ्कः |
|---|---|---|---|---|---|
| | **१९ नियावलिकाउपाङ्गसूत्रस्य विषयानुक्रमः** | | | | |
| १-१९ | अध्ययनं-१ कालः | ५ | -२१ | अध्ययनानि-३......१० | २६ |
| -२० | अध्ययनं-२ सुकालः | २६ | | कृष्णः, सुकृष्णः इत्यादि | |
| | **२० कल्पवतंसिकाउपाङ्गसूत्रस्य विषयानुक्रमः** | | | | |
| १ | अध्ययनं-१ पद्मः | २७ | ३-५ | अध्ययनानि-३.....१० | २८ |
| -२ | अध्ययनं-२ महापद्मः | २८ | | भद्रः, समुद्रः इत्यादि | |
| | **२१ पुष्पिकाउपाङ्गसूत्रस्य विषयानुक्रमः** | | | | |
| १-३ | अध्ययनं-१ चन्द्रः | ३० | -९ | अध्ययनं-५ पूर्णभद्रः | ४८ |
| -४ | अध्ययनं-२ सूर्यः | ३२ | -१० | अध्ययनं-६ माणिभद्रः | ४८ |
| -७ | अध्ययनं-३ शुक्रः | ३२ | -११ | अध्ययनानि-७......१० | ४९ |
| -८ | अध्ययनं-४ बहुपुत्रिका | ४० | | दत्तः, शिवः इत्यादि | |
| | **२२ पुष्पचूलिकाउपाङ्गसूत्रस्य विषयानुक्रमः** | | | | |
| १-३ | अध्ययनं-१ भूता | ५० | -३ | अध्ययनानि-२.....१० | ५२ |
| | **२३ वृष्णिदशाउपाङ्गसूत्रस्य विषयानुक्रमः** | | | | |
| १-३ | अध्ययनं-१ निषढः | ५३ | ४-५ | अध्ययनानि-२......१२ | ५७ |
| | **२४ चतुःशरणप्रकीणर्कसूत्रस्य विषयानुक्रमः** | | | | |
| १-७ | आवश्यक-अर्थाधिकारः | ५८ | -५४ | दुष्कृतगर्हा | ७४ |
| -९ | मंगल-आदिः | ६० | -५८ | सुकृत-अनुमोदना | ७७ |
| -४८ | चतुःशरणं | ६१ | -६३ | उपसंहारः | ७८ |
| | **२५ आतुरप्रत्याख्यानप्रकीर्णकसूत्रस्य विषयानुक्रमः** | | | | |
| १-१० | प्रथमा-प्ररुपणा | ७९ | -४५ | असमाधिमरणं | ८६ |
| -३३ | प्रतिक्रमणादि आलोचना | ८१ | -७१ | पंडितमरण एवं | ८८ |
| -३६ | आलोचनादायकः-ग्राहकः | ८६ | | आराधनादिः | |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| मूलाङ्कः | विषयः | पृष्ठाङ्कः | मूलाङ्कः | विषयः | पृष्ठाङ्कः |
|---|---|---|---|---|---|
| | २६ महाप्रत्याख्यानप्रकीर्णकसूत्रस्य विषयानुक्रमः | | | | |
| १-२ | मङ्गलं | ९३ | -१७ | भावना | ९४ |
| -७ | व्युत्सर्जन, क्षमापनादि | ९३ | -३६ | मिथ्यात्वत्याग, आलोचनादि | ९५ |
| -१२ | निन्दा-गर्हाआदि | ९४ | -१४२ | विविधं धर्मोपदेशादि | ९७ |
| | २७ भक्तपरिज्ञाप्रकीर्णकसूत्रस्य विषयानुक्रमः | | | | |
| १-४ | मङ्गलं, ज्ञानमहत्ता | ११० | -२३ | आलोचना प्रायश्चित् | १११ |
| -७ | शाश्वत अशाश्वत सुखं | ११० | -३३ | व्रत-सामायिक-आरोपणं | ११३ |
| -११ | मरण भेदानि | १११ | -१७३ | आचरणा, क्षमापना आदि | ११४ |
| | २८ तन्दुलवैचारिकप्रकीर्णकसूत्रस्य विषयानुक्रमः | | | | |
| १-३ | मङ्गलं-द्वाराणि | १३१ | -७४ | देहसंहननं-आहारादि | १६० |
| -७ | गर्भः-प्रकरणं | १३३ | -९५ | काल-प्रमाणं | १६५ |
| -५७ | जीवस्यदशदशा | १३४ | -११६ | अनित्य, अशुचित्वादि | १७६ |
| -६४ | धर्मोपदेश एवं फलं | १५० | -१६१ | उपदेशः, उपसंहारः | १९४ |
| | २९ संस्तारकप्रकीर्णकसूत्रस्य विषयानुक्रमः | | | | |
| १-३० | मङ्गलं, संस्तारकगुणाः | १९५ | -८८ | संस्तारकस्य दृष्टान्ताः | २०१ |
| -५५ | संस्तारकस्वरूपं, लाभं | १९८ | -१३३ | भावना | २०५ |
| | ३० गच्छाचारप्रकीर्णकसूत्रस्य विषयानुक्रमः | | | | |
| १-२ | मङ्गलं-आदि | २०९ | -१०६ | गुरुस्वरूपं | २२३ |
| -६ | गच्छे वसमानस्य गुणाः | २१० | -१३४ | आर्यास्वरूपं | २४६ |
| -४० | आचार्यस्वरूपं | २१० | -१३७ | उपसंहारः | २५६ |
| | ३१ गणिविद्याप्रकीर्णकसूत्रस्य विषयानुक्रमः | | | | |
| १-३ | प्रथमंद्वारं-दिवसं | २५९ | -५८ | षष्ठंद्वारं-मुहूर्तं | २६४ |
| -१० | द्वितीयंद्वारं-तिथिः | २५९ | -६३ | सप्तमंद्वारं-शकुनबलं | २६६ |
| -४१ | तृतीयंद्वारं-नक्षत्रः | २६० | -७१ | अष्टमंद्वारं-लग्नः | २६६ |
| -४६ | चतुर्थद्वारं-करणं | २६४ | -८४ | नवमंद्वारं-निमित्तबलं | २६७ |
| -४८ | पञ्चमंद्वारं-ग्रहः | २६४ | -८५ | उपसंहारः | २६९ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| मूलाङ्कः | विषयः | पृष्ठाङ्कः | मूलाङ्कः | विषयः | पृष्ठाङ्कः |
|---|---|---|---|---|---|
| | ३२ देवेन्द्रस्तवप्रकीर्णकसूत्रस्य विषयानुक्रमः | | | | |
| १-११ | मङ्गलं, देवेन्द्रपृच्छा | २७० | -२७३ | वैमानिक-अधिकारः | २८९ |
| -६६ | भवनपति अधिकारः | २७१ | -३०२ | इसिप्रभापृथ्वि एवं | ३०१ |
| -८० | वाणव्यन्तर अधिकारः | २७७ | | सिद्धाधिकारः | |
| -१६१ | ज्योतिष्क-अधिकारः | २७९ | -३०७ | जिनऋध्धिः, उपसंहारः | ३०५ |
| | ३३ मरणसमाधिप्रकीर्णकसूत्रस्य विषयानुक्रमः | | | | |
| १-१० | मरणविधिः आरम्भः | ३०६ | -२५७ | आतुरप्रत्याख्यानादि | ३३० |
| -८३ | आराधना, मरणस्वरूपं | ३०७ | -२६६ | पञ्चमहाव्रतस्यरक्षा | ३३६ |
| -९२ | आचार्यस्य गुणाः | ३१६ | -४१२ | आराधना, उपदेश आदिः | ३३७ |
| -१२६ | आलोचनावर्णनं | ३१७ | -५२५ | विविध-उदाहरणादि | ३५४ |
| -१२८ | तपसः भेदाः | ३२० | -५५० | मरणभेदानि निरुपणं | ३६७ |
| -१५७ | ज्ञानादि गुण वर्णनं | ३२१ | -५६९ | आराधना-अनुचिंतन | ३७० |
| -१७४ | आत्मनः शुद्धि | ३२३ | -६३९ | द्वादश-भावना | ३७२ |
| -२०७ | संलेखना | ३२६ | -६६४ | पण्डितमरणं, उपसंहारः | ३८० |


# भागः-१४

# आगमाः-१९.....३३ पर्यन्ताः

## - निरयावलिकादिउपाङ्गपञ्चक -

## - दशप्रकिर्णकानि -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# આર્થિક અનુદાતા

-પ.પૂ. માલવભુષણ તપસ્વી આચાર્યદેવ શ્રી નવરત્નસાગર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી શ્રી લાલભાઈ દેવચંદ શાહ તરફથી - નકલ એક.

-પ.પૂ. સરળ સ્વભાવી-શ્રીમદ્ ભગવતીસૂત્ર વ્યાખ્યાન પટુ આચાર્યદેવ શ્રી નરદેવસાગરસૂરીશ્વરજી મ.સા. તથા પૂજ્યશ્રીના શિષ્યરત્ન તપસ્વી ગણિવર્યશ્રી ચંદ્રકીર્તિસાગરજી મ.સા.ની પ્રેરણાથી શ્રી પુરુષાદાનીય પાર્શ્વનાથ શ્વે. મૂર્તિ. જૈન સંઘ, દેવકીનંદન સોસાયટી, અમદાવાદ તરફથી નકલ એક.

-પ.પૂ. શાસન પ્રભાવક-ક્રિયારાગી આચાર્યદેવશ્રી વિજય ઋચકચંદ્ર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી એક સદ્‌ગૃહસ્થ તરફથી નકલ એક.

-પ.પૂ. સાહિત્યપ્રેમી મુનિરાજ શ્રી સર્વોદય સાગરજી મ.સા.ની પ્રેરણાથી-"અચલગચ્છાધિપતિ પ.પૂ.આ.ભ.શ્રી ગુણસાગરસૂરીશ્વરજી મ.સા.ના શિષ્યરત્ન પ.પૂ. મુનિરાજ શ્રી ચારિત્રરત્નસાગરજી મ. ની ૧૯મી અઠ્ઠાઇ નિમિત્તે-શ્રી ચારિત્રરત્ન ફા.ચે.ટ્રસ્ટ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્ત્યકારિકા સાધ્વી શ્રી મલયાશ્રીજી મ.સા.ના શિષ્યા વ્યવહાર વિચક્ષણા પૂ. સાધ્વી શ્રી હિતજ્ઞાશ્રીજી મ.ની પ્રેરણાથી જૈન આરાધના મંદિર-"જ્ઞાનખાતા" તરફથી નકલ એક.

-પ.પૂ. સૌમ્યમૂર્તિ સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી મ.ની પ્રેરણાથી પ.પૂ. ગુરુમાતા-વાત્સલ્યમૂર્તિ સા.શ્રી રત્નત્રયાશ્રીજી મ.ની પંચમી પુન્યતિથિ નિમિત્તે શ્રીમતી લીલમબેન પ્રાણલાલ પી. દામાણી તરફથી નકલ એક.

-પ.પૂ. સ્વનામધન્યા સા. શ્રી સૌમ્યગુણાશ્રીજી તથા તેઓના શિષ્યા સા.શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી-૨૦૫૩ના યશસ્વી ચાતુર્માસ નિમિત્તે શ્રી પાર્શ્વપદ્માવતી જૈન સંઘ, પારૂલનગર, અમદાવાદ તરફથી નકલ બે.

-પ.પૂ. રત્નત્રયારાધકા સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી તથા તેઓશ્રીના શિષ્યા સા. શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી સંવત ૨૦૫૪ના નિર્મળ આરાધનામય ચાતુર્માસની સ્મૃતિમાં-ઘાટલોડિયા (પાવાપુરી) જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ તરફથી નકલ એક.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

-પ.પૂ. સાધ્વી શ્રી રત્નત્રયાશ્રીજી મ.ના પરમ વિનેયા સા.શ્રી સૌમ્યગુણાશ્રીજીની પ્રેરણાથી તેઓના સંસારીભાઈશ્રી ઇન્દ્રવદનભાઈ દામાણીના અનુમોદનીય પુરુષાર્થથી "આગમ દીપ-સંપુટ"ના બદલામાં પ્રાપ્ત રકમમાંથી-નકલ ચાર.

-પ.પૂ. પ્રશમરસનિમગ્ના સાધ્વીશ્રી પ્રશમશીલાશ્રીજી મ.ની પ્રેરણાથી-સમ્મેતશિખર તિર્થોદ્ધારિકા પ.પૂ. સાધ્વીશ્રી રંજનશ્રીજી મ.સા.ના શિષ્યા અપ્રતિમ વૈયાવૃત્ત્યકારિકા સા.શ્રી મલયાશ્રીજી તત્ શિષ્યા સા. શ્રી નરેન્દ્રશ્રીજી-તત્ શિષ્યા સા. શ્રી પ્રગુણાશ્રીજી મ.ના. આત્મશ્રેયાર્થે-અરિહંત ટાવર, જૈન સંઘ, મુંબઇ તરફથી નકલ એક.

-પ.પૂ. આગમોદ્ધારક આચાર્યદેવશ્રી ના સમુદાયવર્તી પ.પૂજ્ય વૈયાવૃત્ત્યકારિકા સા.શ્રી મલયાશ્રીજી મ.ના શિષ્યા પૂ.સા. શ્રી કૈવલ્યશ્રીજી મ.ના શિષ્યા પૂ.સા.શ્રી ભવ્યાનંદશ્રીજી મ.સા.ના સુશિષ્યા મિષ્ટભાષી સાધ્વીશ્રી પૂર્ણપ્રજ્ઞાશ્રીજી મ.સા. તથા તેમના વિનિત શિષ્યા સા. શ્રી પૂર્ણદર્શિતાશ્રીજી તથા સા. પૂર્ણનંદીતાશ્રીજીની પ્રેરણાથી-સર્વોદય પાર્શ્વનાથ ચેરીટેબલ ટ્રસ્ટ, મુલુન્ડ મુંબઈ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્ત્યકારિકા સાધ્વીશ્રી મલયાશ્રીજી મ.ના પ્રશિષ્યા સા. શ્રી ભવ્યાનંદશ્રીજીમ.ના સુવિનિતા સા.શ્રી કલ્પપ્રજ્ઞાશ્રીજી તથા કોકીલકંઠી સા. શ્રી કૈરવપ્રજ્ઞાશ્રજી ની પ્રેરણાથી -મેહુલ સોસાયટી, આરાધનાભવન, સુભાષનગર, વડોદરાની બહેનો તરફથી નકલ એક

-શ્રી વિશાશ્રીમાળી તપગચ્છજ્ઞાતિ-જ્ઞાનખાતું, જૈન પાઠશાળા, જામનગર તરફથી નકલ બે.

-શ્રી મંગળ પારેખનો ખાંચો-જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ. તરફથી ૨૦૫૪ના ચાતુર્માસ નિમિત્તે નકલ બે.

- શ્રી આકોટા જૈન સંઘ, વડોદરાની બહેનો તરફથી નકલ એક.

-શ્રીમતી નયનાબેન રમેશચંદ્ર શાહ, વડોદરાની પ્રેરણાથી આગમોના સેટના બદલામાં પ્રાપ્ત રકમમાંથી નકલ પાંચ.

**શેષ સર્વે રકમ "અમારા"આજ પર્યન્ત પ્રકાશનોના બદલામાં પ્રાપ્ત થયેલી છે.**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमो नमो निम्मल दंसणस्स

पंचम गणधर श्री सुधर्मास्वामिने नमः

# ३३ मरणसमाधि-प्रकिर्णकंसूत्रम्

सच्छायं

(दशमं-प्रकिर्णकम्)

(मूलम् + संस्कृत छाया)

मू. (१) *तिहुयणसरीरिवंदं सप्प (संघ) वयणरयणमंगलं नमिउं ।*
*समणस्स उत्तमट्ठे मरणविहीसंगहं वुच्छं ॥*

छा. त्रिभुवनशरीरिवन्द्यं सत्प्रवचनरचनामंगलं नत्वा ।
श्रमणस्योत्तमार्थाय मरणविधिसंग्रहं वक्ष्ये ॥

मू. (२) *सुणह सुयसारनिहसं ससमयपरसमयवायनिम्मायं ।*
*सीसो समणगुणड्ढं परिपुच्छइ वायगं कंचि ॥*

छा. श्रृणुत श्रुतसारनिकष विसमयपरसमयवादनिष्णातं ।
श्रमणगुणाढ्यं कंचित् वाचकं शिष्यः परिपृच्छति ॥

मू. (३) *अभिजाइसत्तविक्कमसुयसीलविमुत्तिखंतिगुणकलियं ।*
*आयारविणयमद्दवविज्ञाचरणागरमुदारं ॥*

छा. अभिजातिसत्वविक्रमश्रुतशीलविमुक्तिक्षान्तिगुणकलितं ।
आचारविनयमार्दवविद्याचरणाकरमुदारं ॥

मू. (४) *कित्तीगुणगब्भहरं जसखाणिं तवनिहिं सुयसमिद्धं ।*
*सीलगुणनाणदंसणचरित्तरयणागरं धीरं ॥*

छा. कीर्त्तिगुणगर्भधरं यशःखानिं तपोनिधिं श्रुतसमिद्धं ।
शीलगुणज्ञानदर्शनचारित्ररत्नाकरं धीरं ॥

मू. (५) *तिविहं तिकरणसुद्धं मयरहियं दुविहठाण पुणरत्तं ।*
*विनएण कमविसुद्धं चउस्सिरं बारसावत्तं ॥*

छा. त्रिविधत्रिकरणशुद्धं मदरहितं द्विविधे स्थाने पुना रक्तं (रुष्टं) ।
विनयेन क्रमविशुद्धं चतुरिशरो द्वादशावर्त्तं ॥

मू. (६) *दुओणयं आहाजायं एयं काऊण तस्स किइकम्मं ।*
*भत्तीइ भरियहियओ हरिसवसुब्भिन्नरोमंचो ॥*

छा. द्व्यवनतं यथाजातं एतादृशं कृतिकर्म तस्य कृत्वा ।
भक्त्या भृतहृदयो वर्षवशोद्भिन्नरोमाञ्चः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (७) उवएसहेउकुसलं तं पवयणरयणसिरिघरं भणइ ।
इच्छामि जाणिउं जे मरणसमाहिं समासेणं ।।

छा. उपदेशहेतुकुशलं तं प्रवचनरत्नश्रीगृहिकं भणति ।
इच्छामि ज्ञातुं समासेन मरणसमाधिं ।।

मू. (८) अब्भुज्जुयं विहारं इच्छं जिनदेसियं विउपसत्थं।
नाउं महापुरिसदेसियं तु अब्भुज्जुयं मरणं ।।

छा. अभ्युद्यतं विहारमिच्छामि जिनदेशितं विद्वत्प्रशस्तं ।
ज्ञातुं महापुरुषदेशितं अभ्युद्यतं मरणं (इच्छामि) ।।

मू. (९) तुब्भित्थ सामि ! सुअजलहिपारगा समणसंधनिज्जवया ।
तुज्झं खु पायमूले सामन्नं उज्जमिस्सामि ।।

छा. यूयमत्र स्वामिनः श्रुतजलधिपारगाः श्रमणसंघनिर्यामकाः ।
युष्माकमेव पादमूले श्रामण्यमुद्यापयिष्यामि ।।

मू. (१०) सो भरियमहुरजलहरगंभीरसरोनिसन्नओ भणइ ।
सुण दाणि धम्मवच्छल ! मरण समाहिं समासेणं ।।

छा. स भृतजलधरमधुरगंभीरस्वरो निषण्णो भणति ।
श्रृ णु इदानीं धर्मवत्सलामरणसमाधिं समासेन ।।

मू. (११) सुण जह पच्छिमकाले पच्छिमपत्थयरदेसियमुयारं ।
पच्छा निच्छियपत्थं उविंति अब्भुज्जुयं मरणं ।।

छा. श्र णु यथा पश्चिमकाले पश्चिमतीर्थकरदेशितमुदारम् ।
पश्चात् निश्चयपथ्यं उपयान्त्यभ्युद्यतं मरणं (तथा वक्षये) ।।

मू. (१२) *पव्वज्जाई सव्वं काऊणालोयणं च सुविसुद्धं ।*
*दंसणताणचरित्ते निस्सल्लो विहर चिरकालं ।।*

छा. प्रव्रज्यादि सर्वं कृत्वाऽऽलोचनां च सुविशुद्धां ।
दर्शनज्ञानचारित्रेषु निरशल्यो विहर चिरकालम् ।।

मू. (१३) *आउव्वेयसमत्ती तिगिच्छिए जह विसारओ विज्जो ।*
*रोआयंकागहिओ सो निरुयं आउरं कुणइ ।।*

छा. समाप्तायुर्वेदश्चिकित्सायां विशारदश्च यथा वैद्यः ।
रोगातंकागृहीतः स नीरुजमातुरं करोति ।।

मू. (१४) *एवं पवयणसुयसारपारगो सो चरित्तसुद्धीए ।*
*पायच्छित्तविहिन्नू तं अणगारं विसोहेइ ।।*

छा. एवं प्रवचनश्रुतसारपारगः स चारित्रशुद्ध्या ।
प्रायश्चित्तविधिज्ञस्तमनगारं विशोधयति ।।

मू. (१५) *भणइ य तिविहा भणिया सुविहिय ! आराहणा जिणिंदेहिं ।*
*सम्मत्तम्मि य पढमा नाणचरित्तेहिं दो अन्ना ।।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. भणति च त्रिविधा भणिता सुविहित ! आराधना जिनेन्द्रैः ।
सम्यक्त्वे च प्रथमा ज्ञानचारित्रयोर्द्वे अन्ये ॥

मू. (१६) *सद्दहगा पत्तियगा रोयगा जे य वीरवयणस्स ।*
*सम्मत्तमनुसरंता दंसणआराहगा हुंति ॥*

छा. श्रद्दधानाः प्रत्यायका रोचका ये च वीरवचनस्य ।
सम्यक्त्वमनुसरन्तो दर्शने आराधका भवन्ति ॥

मू. (१७) *संसारसमावण्णे य छव्विहे मुक्खमस्सिए चेव ।*
*एए दुविहे जीवे आणाए सद्दहे निच्चं ॥*

छा. संसारसमापन्नांश्च षड्विधान् मोक्षमाश्रितांश्चैव ।
एतान् द्विविधान् जीवान् आज्ञया श्रद्दधाति नित्यम् ॥

मू. (१८) *धम्माधम्मागासं च पुग्गलो जीवमत्थिकायं च ।*
*आणाइ सद्दहंता सम्मत्ताराहगा भणिया ॥*

छा. धर्माधर्माकाशान् च पुद्गलान् जीवास्तिकायं च ।
आज्ञया श्रद्दधानाः सम्यक्त्वाराधका भणिताः ॥

मू. (१९) *अरहंतसिद्धचेइयगुरुसु सुयधम्मसाहुवग्गे य ।*
*आयरियउवज्झाए पव्वयणे सव्वसंघे य ॥*

छा. अर्हत्सिद्धचैत्यगुरुषु श्रुतधर्मे साधुवर्गे च ।
आचार्ये उपाध्याये प्रवचने सर्वसंघे च ॥

मू. (२०) *एएसु भत्तिजुत्ता पूयंता अहरहं अनन्नमणा ।*
*सम्मत्तमनुसरिंता परित्तसंसारिया हुंति ॥*

छा. एतेषु भक्तियुक्ताः (तान्)पूजयन्तः अहरहः अनन्यमनसः ।
सम्यक्त्वमनुसरन्तः परित्तसंसारिका भवन्ति ॥

मू. (२१) *सुविहिय ! इमं पइण्णं असद्दहंतेहिं नेगजीवेहिं ।*
*बालमरणाणि तीए मयाइं काले अनंताइं ॥*

छा. सुविहित ! इमां प्रतिज्ञां (इदं प्रकीर्णके) अश्रद्दधानैरनेकजीवैः ।
बालमरणानि अतीते मृतानि कालेऽनन्तानि ॥

मू. (२२) *एगं पंडियमरणं मरिऊण पुणो बहूणि मरणाणि ।*
*न मरंति अप्पमत्ता चरित्तमाराहियं जेहिं ॥*

छा. एकं पंडितमरणं मृत्वा पुनर्बहूनि मरणानि ।
न म्रियंते अप्रमत्ताः चारित्रमाराद्धं यैः ॥

मू. (२३) *दुविहम्मि अहक्खाए सुसंवुडा पुव्वसंगओमुक्का ।*
*जे उ चयंति सरीरं पंडियमरणं मयं तेहिं ॥*

छा. द्विविधे यथाख्याते सुसंवृताः पूर्वसंगोन्मुक्ताः ।
ये तु त्यजन्ति शरीरं पंडितमरणं मृतं तैः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (२४) *एयं पंडियमरणं जे धीरा उवगया उवाएणं ।*
*तस्स उवाए उ इमा परिकम्मविही उ जुंजीया ।।*

छा. एतत् पंडितमरणं ये धीरा उपगता उपायेन ।
तस्योपाये इमं तु परिकर्मविधिं तु योजयेत् ।।

मू. (२५) *जे कंस संखताडणमारुअजिअगगणपंकयतरूणं ।*
*सरिकप्पा सुयकप्पियआहारविहारचिट्ठागा ।।*

छा. ये क्लेश शंख ताडन मारुत जीव गगन पंकज तरु एभिः ।
सीदृगाचाराः श्रुतकल्पिताहारविहारचेष्टाकाः ।।

मू. (२६) *निच्चं तिदंडविरया तिगुत्तिगुत्ता तिसल्लनिसल्ला ।*
*तिविहेण अप्पमत्ता जगजीवदयावरा समणा ।।*

छा. नित्यं त्रिदण्डविरताः त्रिगुप्तिगुप्तास्त्रिशल्यनिरशल्याः ।
त्रिविधेनाप्रमत्ता जगज्जीवदयापराः श्रमणाः ।।

मू. (२७) *पंचमहव्वयसुत्थिय संपुण्णचरित्त सीलसंजुत्ता ।*
*तह तह मया महेसी हवंति आराहगा समणा ।।*

छा. पंचमहाव्रतसुस्थिताः संपूर्णचारित्राःशीलसंयुक्ताः ।
तथा तथा मृता महर्षयो भवन्त्याराधकाः श्रमणाः ।।

मू. (२८) *इक्कं अप्पाणं जाणिऊण काऊण अत्तहिययं च ।*
*तो नाणदंसणचरित्ततवसुट्ठिया मुनी हुंति ।।*

छा. एकमात्मानं ज्ञात्वा कृत्वा चात्महितदं च ।
ततो ज्ञानदर्शनचारित्रतपःसुस्थिता मुनयो भवन्ति ।।

मू. (२९) *परिणामजोगसुद्धा दोसु य दो दो निरासयं पत्ता ।*
*इहलोए परलोए जीवियमरणासए चेव ।।*

छा. शुद्धपरिणामयोगाः द्वयोश्च (कामभोगयोः)
द्वे स्पर्शनरसने द्वे चक्षुश्रोत्रे दान्ते निराश्रयं च घ्राणं कृतं ।
इहलोके च परलोके च जीविते मरणे च आशंसाः ।।

मू. (३०) *संसारबंधणाणि य रागद्दोसनियलाणि छित्तूणं ।*
*सम्मद्दंसणसुनिसियसुतिक्खधिइमंडलग्गेणं ।।*

छा. संसारबन्धनानि च रागद्वेषनिगडान् छित्वा
सम्यग्दर्शनसुनिशितसुतीक्ष्णधृतिमंडलाग्रेण ।।

मू. (३१) *दुप्पणिहिए य पिहिऊण तिन्नि तिहिं चेव गारवविमुक्का ।*
*कायं मणं च वायं मनवयसा कायसा चेव ।।*

छा. दुष्प्रणिधींश्च पिधाय त्रीन् त्रिभ्य एव गौरवेभ्यो विमुक्ताः ।
कायं मनो वाचं च मनोवचनकायगुप्तिभिरेव निरुन्ध्यात् ।।

मू. (३२) *तवपरसुणा य छित्तूण तिण्णि उजुखंतिविहियनिसिएणं ।*
*दुग्गइमग्गा नरिएण मणवयसाकायए दंडे ।।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. तपःपरशुना च छित्वा त्रीन् दुर्गतिमार्गान् ऋजुक्षान्तिविहिततैक्ष्णयेन ।
पौरुषेण मनोवचःकायान् दण्डान् ॥

मू. (३३) *तं नाऊण कसाए चउरो पंचहि य पंच हंतूणं ।*
*पंचासवे उदिण्णे पंचहि य महव्वयगुणे हिं ॥*

छा. तत् ज्ञात्वा कषायांश्चतुरः पंचभिश्च पंच हत्वा ।
पंचाश्रवानुदीर्णान् पंचभिश्च महाव्रतगुणैः ॥

मू. (३४) *छज्जीवनिकाए रक्खिऊण छलदोसवज्जिया जइणो ।*
*तिगलेसापरिहीणा पच्छिमलेसातिगजुआ य ॥*

छा. षड्जीवनिकायान् रक्षयित्वा दोषषटवर्जिता यतयः ।
त्रिकलेश्यापरिहीणाः पश्चिमलेश्यात्रिकयुताश्च ॥

मू. (३५) *एक्कगदुगतिगचउपणसत्तट्ठगनवदसगठाणेसुं ।*
*असुहेसु विप्पहीणा सुभेसु सय संठिया जे उ ॥*

छा. एकद्वित्रिचतुःपंचसप्ताष्टनवदशस्थानेभ्यः
अशुभेभ्यो विप्रहीणाः शुभेषु च सदा संस्थिता ये तु ॥

मू. (३६) *वेयणवेयावच्चे इरियट्ठाए य संजमट्ठाए ।*
*तह पाणवत्तियाए छट्ठं पुण धम्मचिंताए ॥*

छा. वेदनोपशमाय वैयावृत्याय ईर्यार्थाय च संयमार्थाय ।
तथा प्राणप्रत्ययाय षष्ठं पुनर्धर्मचिन्तायै ॥

मू. (३७) *छसु ठाणेसु इमेसु य अन्नयरे कारणे समुप्पण्णे ।*
*कडजोगी आहारं करंति जयणानिमित्तं तु ॥*

छा. षट्सु कारणेष्वेषु चान्यतरस्मिन् कारणे समुत्पन्ने ।
कृतयोगिन आहारं कुर्वन्ति यतनानिमित्तं तु ॥

मू. (३८) *जोएसु किलायंती सरीरसंकप्पचेट्ठमचयंता ।*
*अविकप्पऽवज्जभीरू उविंति अब्भुज्जयं मरणं ॥*

छा. योगेषु क्लाम्यत्सु शरीरसंकल्पचेष्टामशक्नुवन्तः ।
अविकल्पा अवद्यभीरव उपयान्त्यभ्युद्यतं मरणं ॥

मू. (३९) *आयंके उवसग्गे तितिक्खयाबंभचेरगुत्तीसु ।*
*पाणिदयातवहेउं सरीरपरिहार वुच्छेओ ॥*

छा. आतंक उपसर्ग तितिक्षाब्रह्मचर्यगुप्तिषु ।
प्राणिदयाहेतोः तपोहेतोः शरीरपरिहाराय व्युच्छेदः ॥

मू. (४०) *पडिमासु सीहनिक्कीलियासु घोरे अभिग्गहाईसु ।*
*छव्विय अब्भिंतरए बज्झे य तवे समनुरत्ता ॥*

छा. प्रतिमासु च सिंहनिक्रीडितादिषु घोराभिग्रहादिषु ।
षटसु चैवाभ्यन्तरेषु बाह्येषु च तपसि समनुरक्ताः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (४१) *अविकलसीलायारा पडिवन्ना जे उ उत्तमं अट्ठं ।*
*पुव्विल्लाण इमाण य भणिया आराहणा चेव ।।*

छा. अविकलशीलाचाराः प्रतिपन्ना ये तूत्तममर्थम् ।
पूर्वेषामेषां च भणिता आराधनैव ।।

मू. (४२) *जह पुव्वद्धुअगमणो करणविहीणोऽवि सागरे पोओ ।*
*तीरासन्नं पावइ रहिओऽवि अवल्लागाईहिं ।।*

छा. यथा पूर्वमुद्धूतगमनः करणविहीनोऽपि सागरे पोतः ।
तीरासन्नं प्राप्नोति रहितोऽप्यवल्लकादिभिः ।।

मू. (४३) *तह सुकरणो महेसी तिकरण आराहओ धुवं होइ ।*
*अह लहइ उत्तमट्ठं तं अइलाभत्तणं जाण ।।*

छा. तथा सुकरणो महर्षि त्रिकरण आराधको ध्रुवं भवति ।
असौ लभते उत्तममर्थं तद् अतिलाभवत्वं जानीहि ।।

मू. (४४) *एस समासो भणिओ परिणाममवसेण सुविहियजणस्स ।*
*इत्तो जह करणिज्जं पंडियमरणं तहा सुणह ।।*

छा. एष समासो भणितः परिणामवशेन सुविहितजनस्य ।
इतो यथा करणीयं पंडितमरणं तथा श्रृणुत ।।

मू. (४५) *फासेहिंति चरित्तं सव्वं सुहसीलयं पजहिऊणं ।*
*घोरं परीसहचमुं अहियासिंतो धिइबलेणं ।।*

छा. स्प्रक्ष्यति चारित्रं सर्वं सुखशीलत्वं प्रहाय ।
घोरां परिषहचमूमध्यासीनो धृतिबलेन ।।

मू. (४६) *सद्दे रूवे गंधे रसे य फासे य निग्घिणधिईए ।*
*सव्वेसु कसाएसु य निहंतु परमो सया होहि ।।*

छा. शब्दे रूपे गन्धे रसे च स्पर्शे च निर्घृणतया धृत्या ।
सर्वान् कषायान् निहन्तुं सदा परमो भव ।।

मू. (४७) *चइऊण कसाए इंदिए य सव्वे य गारवे हंतुं ।*
*तो मलियरागदोसो करेह आराहणासुद्धिं ।।*

छा. त्यक्त्वा कषायान् इन्द्रियाणि च सर्वाणि च गौरवाणि हत्वा ।
ततो मर्दितरागद्वेषः कुरुष्वाराधनाशुद्धिं ।।

मू. (४८) *दंसणनाणचरित्ते पव्वजाईसु जो य अइयारो ।*
*तं सव्वं आलोयहि निरवसेसं पणिहियप्पा ।।*

छा. दर्शनज्ञानचारित्रेषु प्रव्रज्यादिषु यश्चातिचारः ।
तं सर्वं आलोचय निरवशेषं प्रणिहितात्मा ।।

मू. (४९) *जह कंटएण विद्धो सव्वंगे वेयणद्दिओ होइ ।*
*तह चेव उद्धियंमि उ निसल्लो निव्वओ होइ ।।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. यथा कण्टकेन विद्धः सर्वेष्वंगेषु वेदनाऽर्दितो भवति ।
तथैव उध्धृते निरशल्यो निर्वृतो (निर्वातः) भवति ।

मू. (५०) *एवमणुद्धियदोसो माइल्लो तेण दुक्खिओ होइ ।*
*सो चेव चत्तदोसो सुविसुद्धो निव्वुओ होइ ।।*

छा. एवमनुद्ध तदोषो मायावी तेन दुःखितो भवति ।
स एव त्यक्तदोषः सुविशुद्धो निर्वृतो भवति ।।

मू. (५१) *रागद्दोसाभिहया ससल्लमरणं मरंति जे मूढा ।*
*ते दुक्खसल्लबहुला भमंति संसारकंतारे ।।*

छा. रागद्वेषाभिहताः सशल्यं मरणं म्रियन्ते ये मूढाः ।
ते दुःखिनो बहुशल्या भ्राम्यन्ति संसारकान्तारे ।।

मू. (५२) *जे पुण तिगारवजढा निस्सल्ला दंसणे चरित्ते य ।*
*विहरंति मुक्कसंगा खवंति ते सव्वदुक्खाइं ।।*

छा. ये पुनस्त्रिगौरवरहिता निरशल्या दर्शने चारित्रे च ।
विहरन्ति मुक्तसंगाः क्षपयन्ति तानि सर्वदुःखानि ।।

मू. (५३) *सुचिरमवि संकिलिट्ठं विहरितं झाणसंवरविहीणं ।*
*नाणी संवरजुत्तो जिणइ अहोरत्तमित्तेणं ।।*

छा. सुचिरमपि संक्लिष्टं विहृतं ध्यानसंवरविहीनं ।
ज्ञानी संवरयुक्तो जयति अहोरात्रमात्रेण ।।

मू. (५४) *जं निज्जरेइ कम्मं असंवुडो सुबहुणाऽवि कालेणं ।*
*तं संवुडो तिगुत्तो खवेइ ऊसासमित्तेणं ।।*

छा. यद् निर्जरयति कर्म असंवृतः सुबहुनाऽपि कालेन ।
तत् संवृतस्त्रिगुप्तः क्षपयत्युच्छ्वासमात्रेण ।।

मू. (५५) *सुबहुस्सुयावि संता जे मूढा सीलसंजमगुणेहिं ।*
*न करंति भावसुद्धिं ते दुक्खनिभेलणा हुंति ।।*

छा. सुबहुश्रुता अपि सन्तो ये मूढाः शीलसंयमगुणेषु ।
न कुर्वन्ति भावशुद्धिं ते दुःखभागिनो (गृहाणि) भवन्ति ।।

मू. (५६) *जे पुण सुयसंपन्ना चरित्तदोसेहिं नोवलिप्पंति ।*
*ते सुविसुद्धचरित्ता करंति दुक्खक्खयं साहू ।।*

छा. ये पुनः श्रुतसंपन्नाश्चारित्रदोषैर्नोपलप्यन्ते ।
ते सुविशुद्धचारित्राः कुर्वन्ति दुःखक्षयं साधवः ।।

मू. (५७) *पुव्वमकारियजोगो समाहिकामोऽवि मरणकालम्मि ।*
*न भवइ परीसहसहो विसयसुहपराइओ जीवो ।।*

छा. पूर्वमकृतयोगः समाधातुकामोऽपि मरणकाले ।
न भवति परीषहसहो विषयसुखपराजितो जीवः ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (५८) *तं एवं जाणंतो महंतरं लाहगं सुविहिएसु।*
*दंसणचरित्तसुद्धीइ निस्सल्लो विहर तं धीर ! ॥*

छा. तदेवं जानानो महत्तरं लाभं सुविहितेषु।
दर्शनचारित्रशुद्ध्या निरशल्यो विहर त्वं धीर ! ॥

मू. (५९) *इत्थ पुण भावणाओ पंच इमा हुं संकिलिट्ठाओ।*
*आराहिंत सुविहिया जा निच्चं वज्जणिज्जाओ ॥*

छा. अत्र पुनर्भावनाः पञ्चेमा भवन्ति संक्लिष्टाः।
आराधकैः सुविहिताः ! या नित्यं वर्जनीयाः ॥

मू. (६०) *कंदप्पा देवकिब्बिस अभिओगा आसुरी य संमोहा।*
*एयाउ संकिलिट्ठा असंकिलिट्ठा हवइ छट्ठा ॥*

छा. कान्दर्पी देवकिल्बिषी आभियोगी आसुरी च सांमोही।
एताः संक्लिष्टा असंक्लिष्टा भवति षष्ठी ॥

मू. (६१) *कंदप्प कोकुयाइय दवसीलो निच्चहासणकहाओ।*
*विम्हाविंतो उ परं कंदप्पं भावणं कुणइ ॥*

छा. कन्दर्पचेष्टावान् कोकुचिकः द्रवशीलो नित्यहासनकथाकश्च।
विस्मापयन् परं तु कान्दर्पी भावनां करोति ॥

मू. (६२) *नाणस्स केवलीणं धम्मायरियस्स संघसाहूणं।*
*माई अवण्णवाई किब्बिसियं भावणं कुणइ ॥*

छा. ज्ञानस्य केवलिनां धर्माचार्यस्य संघस्य साधूनां च।
मायी अवर्णवादी किल्बिषिकीं भावनां करोति ॥

मू. (६३) *मंताभिओगं कोउग भूईकम्मं च जो जने कुणइ।*
*सायरसइड्ढिहेउं अभिओगं भावणं कुणइ ॥*

छा. मंत्राभियोगौ कौतुकं भूतिकर्म च यो जनेषु करोति।
सातरसर्द्धिहेतोराभियोगीं भावनां करोति ॥

मू. (६४) *अनुबद्धरोसवुग्गहसंपत्त तहा निमित्तपडिसेवी।*
*एएहिं कारणेहिं आसुरियं भावणं कुणइ ॥*

छा. अनुबद्धरोषव्युद्ग्रहसंप्राप्तास्तथा निमित्तप्रतिसेविनः।
एतैः (एव) कारणैरासुरीं भावना करोति ॥

मू. (६५) *उम्मग्गदेसमा नाण(मग्ग)दूसणा मग्गविप्पणासो अ।*
*मोहेण मोहयंतंसि भावणं जाण सम्मोहं ॥*

छा. उन्मार्गदेशना ज्ञान(मार्ग)दूषणं मार्गविप्रणाशश्च (तान् कुर्वति)।
मोहेन च मोहयति भावनां जानीहि संमोहीम् ॥

मू. (६६) *एयाउ पंच वज्जिय इणमो छट्ठीइ विहर तं धीर ! ।*
*पंचसमिओ तिगुत्तो निस्संगो सव्वसंगेहिं ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. एताः पंच वर्जयित्वा अनया षष्ठ्या विहर त्वं धीर ! ।
पञ्चसमितस्त्रिगुप्तो निस्संगः सर्वसंगैः ॥

मू. (६७) *एयाए भावणाए विहर विसुद्धाइ दीहकालम्मि ।*
*काऊण अंत सुद्धिं दंसणनाणे चरित्ते य ॥*

छा. एतया भावनया विशुद्धया दीर्घकालं विहर ।
कृत्वा अन्त्ये शुद्धिं दर्शनज्ञानचारित्रेषु च ॥

मू. (६८) *पंचविहं जे सुद्धिं पंचविहविवेगसंजुयमकाउं ।*
*इह उवणमंति मरणं ते उ समाहिं न पाविंति ॥*

छा. पंचविधां ये शुद्धिं पंचविधविवेकसंयुतामकृत्वा ।
इहोपगच्छन्ति मरणं ते समाधिं न प्राप्नुवन्ति ॥

मू. (६९) *पंचविहं जे सुद्धिं पत्ता निखिलेण निच्छियमईया ।*
*पंचविहं च विवेगं ते हु समाहिं परं पत्ता ॥*

छा. पंचविधां ये शुद्धिं प्राप्ता निखिलेषु निश्चियमतिकाः ।
पञ्चविधं च विवेकं ते एव समाधिं परं प्राप्ताः ॥

मू. (७०) *लहिऊणं संसारे सुदुल्लहं कहवि माणुसं जम्मं ।*
*न लहंति मरणदुलहं जीवा धम्मं जिनक्खायं ॥*

छा. लब्ध्वा संसारे सुदुर्लभं कथमपि मानुषं जन्म ।
न लभंते मरणे दुर्लभं जीवा धर्म जिनाख्यातं ॥

मू. (७१) *किच्छाहि पावियम्मिवि सामण्णे कम्मसत्तिओसन्ना ।*
*सीयंति सायदुलहा पंकोसन्नो जहा नागो ॥*

छा. कष्टैः प्राप्तेऽपि श्रामण्ये कर्मशक्त्यवसन्नाः ।
सीदन्ति दुर्लभसाताः पंकावसन्नो यथा नागः ॥

मू. (७२) *जह कागणीइ हेउं मणिरयणाणं तु हारए कोडिं ।*
*तह सिद्धसुहपरुक्खा अबुहा सज्जंति कामेसुं ॥*

छा. यथा काकिण्या हेतोर्मणिरत्नानां तु हारयेत् कोटीं ।
तथा परोक्षसिद्धसौख्याः सज्यन्तेऽबुधाः कामेषु ॥

मू. (७३) *चोरो रक्खसपहओ अत्थत्थी हणइ पंथियं मूढो ।*
*इय लिंगी सुहरक्खसपहओ विसयाउरो धम्मं ॥*

छा. चौरो राक्षसप्रहतोऽर्थार्थी पांथं मूढो हन्ति ।
इति लिंगी सुखराक्षसप्रहतो विषयातुरो धर्मं ॥

मू. (७४) *तेसुवि अलद्धपसरा अवियण्हा दुक्खिया गयमईया ।*
*समुविंति मरणकाले पगामभयभेरवं नरयं ॥*

छा. तेष्वपि अलब्धप्रसराः अवितृष्णा दुःखिता गतमतिकाः ।
समुपयान्ति मरणकालाद् (परं) प्रकामभयभैरवं नरकं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (७५) *धम्मो न कओ साहू न जेमिओ न य नियंसियं सण्हं ।*
*इण्हिं परं परासुत्ति य नेव य पत्ताइं सुक्खाइं ॥*

छा. धर्मो न कृतः साधुर्न जिमितः न च श्लक्ष्णं निवसितं ।
इदानीं परं परासुरिति च नैव च प्राप्तानि सौख्यानि ॥

मू. (७६) *साहूणं नोवकयं परलोयच्छेय संजमो न कओ ।*
*दुहओऽवि तओ विहलो अह जम्मो धम्मरुक्खाणं ॥*

छा. साधुभ्यो नोपकृतं परलोकच्छेकः संयमश्च न कृतः ।
द्विघातोऽपि ततो विफलमिदं जन्म धर्मरूक्षाणां ॥

मू. (७७) *दिक्खं मइलेमाणा मोहमहावत्तसागराभिहया ।*
*तस्स अपडिक्कमंता मरंति ते बालमरणाइं ॥*

छा. दीक्षां मलिनयन्तो मोहमहावर्त्तसागराभिहताः ।
तस्मादप्रतिक्राम्यन्तो म्रियन्ते ते बालमरणानि ॥

मू. (७८) *इय अवि मोहपउत्ता मोहं मोत्तूण गुरुसगाम्मि ।*
*आलोइय निस्सल्ला मरिउं आराहगा तेऽवि ॥*

छा. एवमपि मोहप्रयुक्ता मोहं मुक्त्वा गुरुसकाशे ।
आलोच्य निरशल्या मर्तुं (प्रत्यलाः) आराधकास्तेऽपि ॥

मू. (७९) *इत्थ विसेसो भण्णइ छलणा अवि नाम हुज्ज जिनकप्पो ।*
*किं पुण इयरमुणीणं तेण विही देसिओ इणमो ॥*

छा. अत्र विशेषो भण्यते छलनमपि नाम भवेत् जिनकल्पे ।
किं पुनरितरमुनीनां ? तेन विधिर्दर्शितोऽयम् ॥

मू. (८०) *अप्पविहीणा जाहे धीरा सुयसारझरियपरमत्था ।*
*ते आयरिय विदिन्नं उविंति अब्भुज्जयं मरणं ॥*

छा. यदाऽऽ (वीर्या) त्मविहीनास्तदा धीराः स्मृतश्रुतसागरपरमार्था ।
ते आचार्यविदत्तं मरणमभ्युद्यतमुपयान्ति ॥

मू. (८१) *आलोयणाइ १ संलेहणाइ २ खमणाइ ३ काल ४ उस्सग्गे ५ ।*
*उग्गासे ६ संथारे ७ निसग्ग ८ वेरग्ग ९ मुक्खाए १० ॥*

छा. आलोचना संलेखना क्षामणा काल उत्सर्गः ।
अवकाशः संस्तारकः निसर्गो वैराग्यं मोक्षः ॥

मू. (८२) *झाणविसेसो ११ लेसा १२ सम्मत्तं १३ पायगमणयं १४ चेव ।*
*चउदसओ एस विही पढमो मरणंमि नायव्वो ॥*

छा. ध्यानविशेषो लेश्या सम्यक्त्वं पादपोपगमनं चैव ।
चतुर्दशक एष विधि प्रथमं मरणे ज्ञातव्यः ॥

मू. (८३) *विनओवयार माणस्स भंजणा पूयणा गुरुजणस्स ।*
*तित्थयराण य आणा सुयधम्माऽऽराहणाऽकिरिया ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. विनय उपचारो मानस्य भंगः पूजना गुरूजनस्य ।
तीर्थकराणां च आज्ञा श्रुतधर्माराधनाऽक्रिया ।।

मू. (८४) *छत्तीसाठाणेसु य जे पवयणसारझरियपरमत्था ।*
*तेसिं पासे सोही पन्नत्ता धीरपुरिसेहिं ।।*

छा. षट्त्रिंशति स्थानेषु च ये स्मृतप्रवचनसारपरमार्था ।
तेषां पार्श्वे शुद्धि प्रज्ञप्ता धीरपुरुषैः ।।

मू. (८५) *वयछक्कं ६ कायछक्कं १२ बारसगं तह अकप्प १३ गिहिभाणं १४ ।*
*पलियंक १५ गिहिनिसिज्ञा १६ ससोभ १७ पलिमज्ञण सिणाणं १८ ।।*

छा. व्रतषट्कं कायषट्कं द्वादशकं तथा अकल्प्यं गृहिभाजनं ।
पल्यंको गृहिनिषद्या सशोभत्वं परिमार्जनं स्नानं ।।

मू. (८६) *आयारवं च १ उवधारवं च २ ववहारविहिविहिन्नू य ।*
*उव्वीलगा य धीरा परूवणाए विहिण्णू या ३ ।।*

छा. आचारवन्तः उपधारणावन्तश्च व्यवहारविधिविधिज्ञाश्च ।
अपव्रीडकाश्च धीराः प्ररूपणाया विधिज्ञाश्च ।।

मू. (८७) *तह य अवायविहिन्नू ४ निज्ञवगा ५ जिनमयम्मि गहियत्था ६ ।*
*अपरिस्साई ७ य तहा विस्सासरहस्स निच्छिड्डा ८ ।।*

छा. तथा चापायविधिज्ञा निर्यामिका जिनमते गृहीतार्था ।
अपरिश्राविनश्च तथा विश्वासरहस्यनिश्छिद्राः ।।

मू. (८८) *पढमं अट्ठारसगं अट्ठ य ठाणाणि एव भणियाणि ।*
*इत्तो दस ठाणाणि य जेसु उवट्ठावा भणिया ।।*

छा. प्रथममष्टादशकं अष्ट च स्थानानि एवं भणितानि ।
इतो दश स्थानानि च येषूपस्थापना भणिता ।।

मू. (८९) *अणवट्ठतिगं पारंचिगं च तिगमेय छहि गिहीभूया ६ ।*
*जाणंति जे उ एए सुअरयणकरंडगा सूरी ।।*

छा. अनवस्थाप्यत्रिकं पाराश्चिकत्रिकं चैतानि षड्भिर्गृहीभूताः ।
जानन्ति ये त्वेतान् श्रुतरत्नकरण्डकाः सूरयः ।।

मू. (९०) *सम्मद्दंसणचत्तं जे य वियाणंति आगमविहिन्नू ७ ।*
*जाणंति चरित्ताओ अ निग्गयं अपरिसेसाओ ८ ।।*

छा. त्यक्तसम्यग्दर्शनान् यॉश्च विजानन्ति आगमविधिज्ञाः ।
जानन्ति चारित्रात् निर्गतं चापरिशेषात् ।।

मू. (९१) *आरंभे वट्टइ चिअत्तकिच्चो अणणुतावी य ९ ।*
*सोगो य भवे दसमो १० जेसूवट्ठावणा भणिया ।।*

छा. य आरंभे वर्त्तते त्यक्तकार्योऽननुतापी च ।
शोक(भोग)श्च भवेद्दशमो येषूपस्थापना भणिता ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (९२) *एएसु विहिविहण्णू छत्तीसाठाणएसु जे सूरी।*
*ते पवयणसुहकेऊछत्तीसगुणत्ति नायव्वो ॥*

छा. एतेषु विधिविधानज्ञाः षट्त्रिंशति स्थानेषु ये सूरयः ।
ते प्रवचनशुभकेतवः षट्त्रिंशद्गणा इति ज्ञातव्याः ॥

मू. (९३) *तेसिं मेरुमहोयहिमेयणिससिसूरसरिसकप्पाणं ।*
*पायमूले य विसोही करणिज्ञा सुविहियजणेणं ॥*

छा. तेषां मेरुमहोदधिमेदिनीशशिसूर्यसदृक्कल्पानां ।
पादमूले च विशोधि करणीयः सुविहितजनेन ॥

मू. (९४) *काइयवाइयमाणसियसेवणं दुप्पओगसंभूयं ।*
*जो अइयारो कोई तं आलोए अगूहिंतो ॥*

छा. कायिकवाचिकमानसिकसेवनं दुष्प्रयोगसंभूतं ।
(तद्रूपो) योऽतिचारः कश्चित् तमालोचयेद् अगूहयन् ॥

मू. (९५) *अमुगंमि इउ काले अमुगत्थे अमुगगामभावेणं ।*
*जं जह निसेवियं खलु जेण य सव्वं तहाऽऽलोए ॥*

छा. अतः अमुकस्मिन् काले अमुकार्थे अमुकग्रामभावेन ।
यद्यथा निषेवितं येन च सर्वं तथैवालोचयेत् ॥

मू. (९६) *मिच्छादंसणसल्लं मायासल्लं नियाणसल्लं च ।*
*तं संखेवा दुविहं दव्वे भावे य बोद्धव्वं ॥*

छा. मिथ्यादर्शनशल्यं मायाशल्यं निदानशल्यं च ।
तत् (शल्यं) संक्षेपात् द्विविधं द्रव्ये भावे च बोद्धव्यं ॥

मू. (९७) *वि(ति)विहं तु भावसल्लं दंसणनाणे चरित्तजोगे य ।*
*सच्चित्ताचित्तेऽविय मीसए यावि दव्वंमि ॥*

छा. त्रिविधं तु भावशल्यं दर्शनि ज्ञाने चारित्रयोगे ।
सचित्ताचित्तयोरपि च मिश्रे चापि द्रव्ये ॥

मू. (९८) *सुहुमंपि भावसल्लं अनुद्धरित्ता उ जो कुणइ कालं ।*
*लज्ञाय गारवेण य नहु सो आराहओ भणिओ ॥*

छा. सूक्ष्ममपि भावशल्यमनुद्ध त्य तु यः कुर्यात् कालं ।
लज्जया गौरवेण च नैव स आराधको भणितः ॥

मू. (९९) *तिविहंपि भावसल्लं समुद्धरित्ता उ जो कुणइ कालं ।*
*पव्वज्ञाई सम्मं स होइ आराहओ मरणे ॥*

छा. त्रिविधमपि भावशल्यं समध्धृ त्य तु यः करोति कालं ।
प्रव्रज्यादौ सम्यक् स भवति आराधको मरणे ॥

मू. (१००) *तम्हा सुत्तरमूलं अविकूलमविद्दुयं अणुव्विग्गो ।*
*निम्मोहियमणिगूढं सम्मं आलोअए सव्वं ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. तस्मात् सोत्तरमूलं अविकूलं अविद्रुतमनुद्विग्रः ।
निर्मोहितं अनिगूहितं सम्यक् आलोचयेत् सर्वं ॥

मू. (१०१) *जह बालो जंपंतो कज्जमकज्जं च उज्जुयं भणइ ।*
*तं तह आलोएज्जा मायामयविप्पमुक्को य ॥*

छा. यथा बालो जल्पन् कार्यमकार्यं च ऋजुकं भणति ।
तत् तथा आलोचयेत् मायामदविप्रमुक्तश्च ॥

मू. (१०२) *कयपावोऽवि मणूसो आलोइय निंदिउं गुरुसगासे ।*
*होइ अइरेगलहुओ ओहरियभरोव्व भारवहो ॥*

छा. कृतपापोऽपि मनुष्य आलोच्य निन्दयित्वा गुरुसकाशे ।
उत्तारितभर इव भारवाहो भवत्यतिरेकलघुतरः ॥

मू. (१०३) *लज्जाइ गारवेण य जे नालोयंति गुरुसगासम्मि ।*
*धंतंपि सुयसमिद्धा न हु ते आराहगा हुंति ॥*

छा. लज्जया गौरवेण च ये नालोचयंति गुरुसकाशे ।
बाढमपि श्रुतसमृद्धा नैव ते आराधका भवन्ति ॥

मू. (१०४) *जह सुकुसलोऽवि विज्जो अन्नस्स कहेइ अत्तणो वाहिं ।*
*तं तह आलोयव्वं सुट्ठुवि ववहारकुसलेणं ॥*

छा. यथा सुकुशलोऽपि वैद्यः अन्यस्मै कथयति आत्मनो व्याधिं ।
तत् तथाऽऽलोचयितव्यं सुष्ठवपि व्यवहारकुशलेन ॥

मू. (१०५) *जं पुव्वं तं पुव्वं जहाणुपुव्विं जहक्कमं सव्वं ।*
*आलोइज्ज सुविहिओ कमकालविहिं अभिंदंतो ॥*

छा. यत् पूर्वं तत् पूर्वं यथानुपूर्विं यथाक्रमं सर्वं ।
आलोचयेत् सुविहितः क्रमकालविधीन् अभिन्दानः ॥

मू. (१०६) *अत्तंपरजोगेहि य एवं समुवट्ठिए पओगेहिं ।*
*अमुगेहि य अमुगेहि य अमुयगसंठाणकरणेहिं ॥*

छा. आत्मपरयोगाभ्यां चैवं प्रयोगैः समुपस्थिते ।
अमुकैरमुकैश्च अमुकैः संस्थानकरणैः ॥

मू. (१०७) *वण्णेहि य गंधेहि य सद्दफरिसरसरूवगंधेहिं ।*
*पडिसेवणा कया पज्जवेहिं कया जेहि य जहिं च ।*

छा. वर्णैश्च गन्धैश्च शब्दस्पर्शरसरूपगन्धैः (शब्दैश्च रसस्पर्शस्थानैः)
प्रतिसेवना कृता या पर्यवैः कृता यैर्यत्र च ॥

मू. (१०८) *जो जोगओ अपरिणामओ अ दंसणचरित्त अइयारो ।*
*छट्ठाण बाहिरो वा छट्ठाणब्भंतरो वावि ॥*

छा. यो योगतोऽपरिणामतश्च दर्शनचारित्रातिचारः ।
षट्स्थान्या बाह्यो वा षट्स्थान्या अभ्यन्तरो वापि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (१०९) *तं उज्जुभावपरिणउ रागं दोसं च पयणु काऊणं ।*
*तिविहेण उद्धरिज्ञा गुरुपामूले अगूहिंतो ।।*

छा. तद्दजुभावपरिणतो रागं द्वेषं च प्रतनुकौ कृत्वा ।
त्रिविधेनोद्धरेत् गुरुपादमूले अगूहयन् ।।

मू. (११०) *नवि तं सत्थं च विसं च दुप्पउत्तुव्व कुणइ वेयालो ।*
*जंतंव दुप्पउत्तं सप्पुव्व पमाइणो कुद्धो ।।*

छा. नैव तत् शस्त्र च विषं च दुष्प्रयुक्तो वा करोति वैतालः ।
यन्त्रं वा दुष्प्रयुक्तं सर्पो वा प्रमादिनः क्रुद्धः ।।

मू. (१११) *जं कुणइ भावसल्लं अणुद्धियं उत्तमट्ठकालम्मि ।*
*दुल्लहबोहीयत्तं अनंतसंसारियत्तं च ।।*

छा. यत् करोति भावशल्यमनुध्धृ तमुत्तमार्थकाले ।
दुर्लभबोधिकत्वं अनन्तसंसारिकत्वं च ।।

मू. (११२) *तो उद्धरंति गारवरहिया मूलं पुनब्भवलयाणं ।*
*मिच्छादंसणसल्लं मायासल्लं नियाणं च ।।*

छा. तत उद्धरन्ति गौरवरहिता मूलं पुनर्भवलतानां ।
मिथ्यादर्शनशल्यं मायाशल्यं निदानं च ।।

मू. (११३) *रागेण व दोसेण व भएण हासेण तह पमाएणं ।*
*रोगेणायंकेण व वत्तीइ पराभिओगेणं ।।*

छा. रागेण वा द्वेषेण वा भयेन हास्येन तथा प्रमादेन ।
रोगेणातंकेन वा वृत्या पराभियोगेन ।।

मू. (११४) *गिहिविज्ञापडिएण व सपक्खपरधम्मिओवसग्गेणं ।*
*तिरियंजोणिगएण व दिव्वमणूसोवसग्गेणं ।।*

छा. गृहिविद्यापतितेन वा स्वपक्षपरधार्मिकोपसर्गेन ।
तिर्यग्योनिसंबंधिना वा दिव्यमनुष्योपसर्गेन ।।

मू. (११५) *उवहीइ व नियडीइ व तह सावयपेल्लिएण व परेणं ।*
*अप्पाण भएण कयं परस्स छंदाणुवत्तीए ।।*

छा. उपधिना वा निकृत्या वा तथा श्वापदप्रेरितेन वा परेण ।
आत्मनो भयेन कृतं परस्य छन्दोऽनुवृत्या ।।

मू. (११६) *सहसक्कारमणाभोगओ अ जं पवयणाहिगारेणं ।*
*सन्निकरणे विसोही पुण्णागारो य पन्नत्ता ।।*

छा. सहसाकारात् अनाभोगतश्च यच्च प्रवचनाधिकारेण ।
संज्ञीकरणं विशुद्धि पूर्णाकारश्च प्रज्ञप्ताः (पर्यायाः) ।।

मू. (११७) *उज्जुअमालोइत्ता इत्तो अकरणपरिणाम जोगपरिसुद्धो ।*
*सो पयणुइ पइकम्मं सुग्गइमग्गं अभिमुहेइ ।।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. ऋज्वालाच्य इतोऽकरणपरिणामयोगपरिशुद्धः ।
स प्रतनुकरोति प्रकृतिकर्म सुगतिमार्गमभिमुखयति ॥

मू. (११८) *उवहीनियडिपइट्ठो सोहिं जो कुणइ सोगईकामो ।*
*माई पलिकुंचंतो करेइ बुंदुंछियं मूढो ॥*

छा. उपधिनिकृतिप्रविष्टः शुद्धिं यः करोति सुगतिकामः ।
मायी परिकुंचयन् करोति बिन्दूंछितं मूढः ॥

मू. (११९) *आलोयणाइदोसे दस दोग्गइबंधणे परिहरंतो ।*
*तम्हा आलोइज्जा मायं मुत्तूण निस्सेसं ॥*

छा. आलोचनाया दोषान् दश दुर्गतिबन्धनान् परिहरन् ।
तस्मादालोचयेत् मायां मुक्त्वा निरशेषम् ॥

मू. (१२०) *जे मे जाणंति जिणा अवराहा जेसु जेसु ठाणेसु ।*
*ते तह आलोएमी उवट्ठिओ सव्वभावेणं ॥*

छा. यान् मे जानन्ति जिना अपराधान् येषु येषु स्थानेषु ।
तांस्तथाऽऽलोचयामि उपस्थितः सर्वभावेन ॥

मू. (१२१) *उवट्ठियस्सवि आलोएउं विसुद्धभावस्स ।*
*जं किंचिवि विस्सरियं सहसक्कारेण वा चुक्कं ॥*

छा. एवमुपस्थितस्यापि आलोचयितुं विशुद्धभावस्य ।
यत्किञ्चिदपि विस्मृतं सहसाकारेण वा विमृष्टं ॥

मू. (१२२) *आराहओ तहवि सो गारवपरिकुंचणामयविहूणो ।*
*जिनदेसियस्स धीरो सद्दहगो मुत्तिमग्गस्स ॥*

छा. आराधकस्तथापि स गौरवपरिकुंचनामदविहीनः ।
जिनदेशितस्य धीरः श्रद्धायको मुक्तिमार्गस्य ॥

मू. (१२३) *आकंपण १ अनुमाणण २ जंदिट्ठं ३ बायरं ४ च सुहुमं ५ च ।*
*छन्नं ६ सद्दाउलगं ७ बहुजण ८ अव्वत्त ९ तस्सेवी ॥*

छा. आकंपनमनुमाननं यद् दृष्टं बादरं च सूक्ष्मं च ।
छन्नं शब्दाकुलं बहुजनं अव्यक्तं तत्सेवि॥

मू. (१२४) *आलोयणाइ दोसे दस दुग्गइवड्ढणा पमुत्तूणं ।*
*आलोइज्ज सुविहिओ गारवमायामयविहूणो ॥*

छा. आलोचनाया दोषान् दश दुर्गतिवर्धनान् प्रमुच्य ।
आलोचयेत् सुविहितो गौरवमायामदविहीनः ॥

मू. (१२५) *तो परियागं च बलं आगम कालं च कालकरणं च ।*
*पुरिसं जीअं च तहा खित्तं पडिसेवणविहिं च ॥*

छा. ततः पर्यायं च बलं चागमं कालं च कालकणं च ।
पुरुषं जीतं च तथा क्षेत्रं प्रतिसेवनाविधिं च ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (१२६) *जोग्गं पायच्छित्तं तस्स य दाऊण बिंति आयरिया ।*
*दंसणनाणचरित्ते तवे य कुणमप्पमायंति ।।*

छा. योग्यं प्रायश्चित्तं तस्मै दत्वा ब्रुवते आचार्या ।
दर्शनज्ञानचारित्रेषु तपसि च कुरुष्वाप्रमादमिति ।।

मू. (१२७) *अनसनमूणोयरिया वित्तिच्छेओ रसस्स परिचाओ ।*
*कायस्स परिकिलेसो छट्ठो संलीनया चेव ।।*

छा. अनशनमवमौदर्यं वृत्तिच्छेदो रसस्य परित्यागः ।
कायस्य परिक्लेशः षष्ठी संलीनता चैव ।।

मू. (१२८) *विनए वेयावच्चे पायच्छित्ते विवेग सज्झाए ।*
*अब्भितरं तवविहिं छट्टं झाणं वियाणाहि ।।*

छा. विनयो वैयावृत्यं प्रायश्चित्तं विवेकः स्वाध्यायः ।
अभ्यन्तरं तपोविधिं षष्ठं ध्यानं विजानीहि ।।

मू. (१२९) *बारसविहम्मिवि तवे अब्भितरबाहिरे कुसलदिट्ठे ।*
*नवि अत्थि नवि य होही सज्झायसमं तवोकम्मं ।।*

छा. द्वादशविधेऽपि तपसि साभ्यन्तरबाह्ये कुशलदृष्टे ।
नैवास्ति नापि च भविष्यति स्वाध्यायसमं तपःकर्म ।।

मू. (१३०) *जे पयणुभत्तपाणा सुयहेऊ ते तवस्सिणो समए ।*
*जो अ तवो सुयहीणो बाहिरयो सो छुहाहारो ।।*

छा. ये प्रतनुभक्तपानाः श्रुतहेतोस्ते तपस्विनः समये ।
यच्च तपः श्रुतहीनं बाह्यः स क्षुदाहारः ।।

मू. (१३१) *छट्ठट्ठमदसमदुवालसेहिं अबहुसुयस्स जा सोही ।*
*तत्तो बहुतरगुणिया हविज्ज जिमियस्स नाणिस्स ।।*

छा. षष्ठाष्टमदशमद्वादशैरबहुश्रुतस्य या शुद्धि ।
ततो बहुतरगुणिता भवेत् जिमितस्य ज्ञानिनः ।।

मू. (१३२) *कल्लं कल्लंपि वरं आहारो परिमिओ अ पंतो अ ।*
*न य खमणो पारणए बहु बहुत्तरो बहुविहो होइ ।।*

छा. कल्ये कल्येऽपि वर आहारः परिमिश्च प्रान्तश्च ।
न च क्षपणस्य पारणके बहुः बहुतरो बहुविधो भवति ।।

मू. (१३३) *एगाहेण तवस्सी हविज्ज नत्थित्थ संसओ कोइ ।*
*एगाहेण सुयहरो न होइ धंतंपि तूरमाणो ।।*

छा. एकेनाह्ना तपस्वी भवेत् नास्त्यत्र संशयः कश्चित् ।
एकेनाह्ना श्रुतधरो न भवति बाढमपि त्वरमाणः ।।

मू. (१३४) *सो नाम अनसनतवो जेण मनो मंगुलं न चिंतेइ ।*
*जेण न इंदियहाणी जेण य जोगा न हायंति ।।*

14 | 21

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. तन्नाम अनशनतपो येन मनोऽमंगलं न चिन्तयति।
येन नेन्द्रियहानिर्येन च योगा न हीयन्ते ॥

मू. (१३५) *जं अन्नाणी कम्मं खवेइ बहुआहिं वासकोडीहिं।*
*तं नाणी तिहिं गुत्तो खवेइ ऊसासमित्तेणं ॥*

छा. यदज्ञानी कर्म क्षपयति बहुकाभिर्वर्षकोटीभिः।
तत् ज्ञानी त्रिभिर्गुप्तः क्षपयत्युच्छ्वासमात्रेण ॥

मू. (१३६) *नाणे आउत्ताणं नाणीणं नाणजोगजुत्ताणं।*
*को निज्जरं तुलिज्जा चरणे य परक्कमंताणं ॥*

छा. ज्ञाने आयुक्तानां ज्ञानिनां ज्ञानयोगयुक्तानां।
को निर्जरां तोलयेत् चरणे च पराक्रममाणानां ॥

मू. (१३७) *नाणेण वज्जणिज्जं वज्जिज्जइ किज्जई य करणिज्जं।*
*नाणी जाणइ करणं कज्जमकज्जं च वज्जेउं ॥*

छा. ज्ञानेन वर्जनीयं वर्ज्यते क्रियते च करणीयं।
ज्ञानी जानाति करणं कार्यमकार्यं च वर्जयितुम् ॥

मू. (१३८) *नाणसहियं चरित्तं नाणं संपायगं गुणसयाणं।*
*एस जिणाणं आणा नत्थि चरित्तं विना नाणं ॥*

छा. ज्ञानसहितं चारित्रं ज्ञानं संपादकं गुणशतानां।
एषा जिनानामाज्ञा नास्ति चारित्रं विना ज्ञानं ॥

मू. (१३९) *नाणं सुसिक्खियव्वं नरेण लद्धूण दुल्लहं बोहिं।*
*जो इच्छइ नाउं जे जीवस्स विसोहणामग्गं ॥*

छा. ज्ञानं सुशिक्षयितव्यं नरेण लब्ध्वासुदुर्लभं बोधिं।
य इच्छति ज्ञातुं जीवस्य विशोधनामार्गम् ॥

मू. (१४०) *नाणेण सव्वभावा नज्जंती सव्वजीवलोअंमि।*
*तम्हा नाणं कुसलेण सिक्खियव्वं पयत्तेणं ॥*

छा. ज्ञानेन सर्वभावा ज्ञायन्ते सर्वजीवलोके।
तस्मात् ज्ञानं कुशलेन शिक्षयितव्यं प्रयत्नेन ॥

मू. (१४१) *न हु सक्का नासेउं नाणं अरहंतभासियं लोए।*
*ते धन्ना ते पुरिसा नाणी य चरित्तजुत्ता य ॥*

छा. नैव शक्यं नाशयितुं लोकेऽर्हद्भाषितं ज्ञानं।
ते धन्यास्ते पुरुषा ज्ञानिनश्च चारित्रयुक्ताश्च ॥

मू. (१४२) *बंधं मुक्खं गइरागयं च जीवाण जीवलोयम्मि।*
*जाणंति सुयसमिद्धा जिणसासणचेइयविहिण्णू ॥*

छा. बन्धं मोक्षं गतिमागतिं च जीवानां जीवलोके।
जानन्ति श्रुतसमृद्धा जिनशासनचैत्यविधिज्ञाः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (१४३) *भद्दं सुबहसुयाणं सव्वपयत्थेसु पुच्छणिज्ञाणं ।*
*नाणेण जोऽवयारे सिद्धिपि गएसु सिद्धेसु ॥*

छा. भद्रं बहुश्रुतेभ्यः सर्वपदार्थेषु प्रच्छनीयेभ्यः ।
ज्ञानेन येऽवतारयंति सिद्धिमपि गतान् सिद्धान् ॥

मू. (१४४) *किं इत्तो लड्ढयरं अच्छेरययं व सुंदरतरं वा ? ।*
*चंदमिव सव्वलोगा बहुस्सुयमुहं पलोयंति ॥*

छा. किमितो लष्टतरमाश्चर्यकारकं वा सुन्दरतरं वा ।
चन्द्रमिव सर्वलोका बहुश्रुतमुखं प्रलोकन्ते ॥

मू. (१४५) *चंदाउ नीइ लुण्हा बहुस्सुयमुहाओ नीइ जिनवयणं ।*
*जं सोऊण सुविहिया तरंति संसारकंतारं ॥*

छा. चन्द्रात् निर्गच्छति ज्योत्स्ना बहुश्रुतमुखात् निर्गच्छति जिनवचनं
यत् श्रुत्वा सुविहितास्तरन्ति संसारकान्तारं ॥

मू. (१४६) *चउदसपुव्वधराणं ओहीनाणीण केवलीणं च ।*
*लोगुत्तमपुरिसाणं तेसिं नाणं अभिन्नाणं ॥*

छा. चतुर्दशपूर्वधराणां अवधिज्ञानिनां केवलिनां च ।
लोकोत्तमपुरुषाणां तेषां ज्ञानमभिज्ञानम् ॥

मू. (१४७) *नाणेण विना करणं न होइ नाणंपि करणहीणं तु ।*
*नाणेण य करणेण य दोहिवि दुक्खक्खयं होइ ॥*

छा. ज्ञानेन विना करणंन भवति ज्ञानमपि करणहीनं तु ।
ज्ञानेन च करणेन च द्वाभ्यामपि दुःखक्षयो भवति ॥

मू. (१४८) *दढमूलमहाणंमिवि वरमेगोऽवि सुयसीलसंपन्नो ।*
*मा हु सुयसीलविगला काहिसि माणं पवयणम्मि ॥*

छा. दृढमूलमहाजनेऽपि एकोऽपि श्रुतशीलसंपन्नो वरं ।
श्रुतशीलविकलान् मा मानं प्रवचने कार्षीः ॥

मू. (१४९) *तम्हा सुयम्मि जोगो कायव्वो होइ अप्पमत्तेणं ।*
*जेणऽप्पाण परंपि य दुक्खसमुद्दाओ तारेइ ॥*

छा. तस्मात् श्रुते योगः कर्त्तव्यो भवत्यप्रमत्तेन ।
येनात्मानं परमपि च दुःखसमुद्रात् तारयति ॥

मू. (१५०) *परमत्थम्मि सुदिट्ठे अविणट्ठेसु तवसंजमगुणेसु ।*
*लब्भइ गई विसुद्धा सरीरसारे विणट्ठम्मि ॥*

छा. परमार्थे सुदृष्टे अविनष्टेषु तपःसंयमगुणेषु ।
लभ्यते गतिर्विशुद्धा शरीरसारे विनष्टे ॥

मू. (१५१) *अविरहिया जस्स मई पंचहिं समिईहिं तिहिवि गुत्तीहिं ।*
*न य कुणइ रागदोसे तस्स चरित्तं हवइ सुद्धं ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. अविरहितं पञ्चसु समितिषु तिसृष्वपि गुप्तिषु यस्य मतिः ।
न चकरोति रागद्वेषौ चारित्रं तस्य भवति शुद्धं ॥

मू. (१५२) *उक्कोसचरित्तोऽवि य परिवडई मिच्छभावणं कुणइ ।*
*किं पुण सम्मद्दिट्ठी सरागधम्मंमि वट्टंतो ॥*

छा. उत्कृष्टचारित्रोऽपि च परिपतति मिथ्यात्वभावनां करोति ।
किं पुनः सम्यग्दृष्टि सरागधर्मे वर्त्तमानः ॥

मू. (१५३) *तम्हा घत्तह दोसुवि काउं जे उज्जमं पयत्तेणं ।*
*सम्मत्तम्मि चरित्ते करणम्मि अ मा पमाएह ॥*

छा. तस्माद् यतस्व द्वयोरपि कर्त्तुं उद्यमं प्रयत्नेन ।
सम्यक्त्वे चारित्रे, करणे च मा प्रमादिष्ट ॥

मू. (१५४) *जाव य सुई न नासइ जाव य जोगा न ते पराहीणा ।*
*सद्धा व जा न हायइ इंदियजोगा अपरिहीणा ॥*

छा. यावच्च श्रुतिर्न नश्यति यावच्च योगा न तव परा धीनाः ।
श्रद्धा च यावन्न हीयते इन्द्रिययोगाश्चापरिहीणाः ॥

मू. (१५५) *जाव य खेमसुभिक्खं आयरिया जाव अत्थि निज्जवगा ।*
*इड्ढीगारवरहिया नाणचरणदंसणंमि रया ॥*

छा. यावच्च क्षेमसुभिक्षे यावच्चाचार्या सन्ति निर्यामकाः ।
ऋद्धिगौरवरहिता ज्ञानचरणदर्शनेषु रताः ॥

मू. (१५६) *ताव खमं काउं जे सरीरनिक्खेवणं विउपसत्थं ।*
*समयपडागाहरणं सुविहियइट्ठं नियमजुत्तं ॥*

छा. तावत् क्षमं कर्त्तुं शरीरनिक्षेपणं विद्वत्प्रशस्तं ।
समयपताकाहरणं सुविहितेष्टं नियमयुक्तम् ॥

मू. (१५७) *हंदि अनिच्चा सद्धा सुई य जोगा य इंदियाइं च ।*
*तम्हा एयं नाउं विहरह तवसंजमुज्जुत्ता ॥*

छा. हन्त अनित्या श्रद्धा श्रुतिश्च योगाश्चेन्द्रियाणि च ।
तस्मादेतत् ज्ञात्वा विहरत तपःसंयमोद्युक्ताः ॥

मू. (१५८) *ताएयं नाऊणं ओवायं नाणदंसणचरित्ते ।*
*धीरपुरिसाणुचिन्नं करिंति सोहिं सुयसमिद्धा ॥*

छा. तद् एतत् ज्ञात्वा औपयिकं ज्ञानदर्शनचारित्रेषु ।
धीरपुरुषानुचीर्णां शुद्धिं कुर्वन्ति श्रुतसमृद्धाः ॥

मू. (१५९) *अब्भिंतरबाहिरियं अह ते काऊण अप्पणो सोहिं ।*
*तिविहेण तिविहकरणं तिविहे काले वियडभावा ॥*

छा. अभ्यन्तरां बाह्यां चाथ ते कृत्वाऽऽत्मनः शुद्धिं ।
त्रिविधेन त्रिविधकरणेन त्रिविधे काले विकटभावात् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (१६०) *परिणामजोगसुद्धा उवहिविवेगं च गणविसग्गे य।*
*अज्ञाइयउवस्सयवज्रणं च विगईविवेगं च ॥*

छा. शुद्धपरिणामयोगाः उपधिविवेकं च गणविसर्गं च।
आर्यायाः उपाश्रयवर्जनं च विकृतिविवेकं च ॥

मू. (१६१) *उग्गमउप्पायणएसणाविसुद्धिं च परिहरणसुद्धिं।*
*सन्निहिसंनिचयंमि य तववेयावच्चकरणे य ॥*

छा. उद्‌गमोत्पादनैषणाविशुद्धिं च परिहरणशुद्धिं।
सन्निधिसन्निचये च तपोवैयावृत्यकरणे च ॥

मू. (१६२) *एवं करंतु सोहिं नवसारयसलिलनहयलसभावा।*
*कमकालदव्वपज्जवअत्तपरजोगकरणे य ॥*

छा. एवं कुर्वन्तु शुद्धिं नवशारदसलिलनभस्तलस्वभावाः।
क्रमकालद्रव्यपर्यायात्मपरयोगकरणेषु च ॥

मू. (१६३) *तो ते कयसोहीया पच्छित्ते फासिए जहाथामं।*
*पुप्फावकिन्नयम्मि य तवम्मि जुत्ता महासत्ता ॥*

छा. ततस्ते कृतशुद्धिकाः प्रायश्चित्तानि स्पृष्ट्वा यथास्थाम।
पुष्पाकीर्णके च तपसि युक्ताः महासत्त्वाः ॥

मू. (१६४) *तो इंदियपरिकम्मं करिंति विसयसुहनिग्गहसमत्था।*
*जयणाइ अप्पमत्ता रागद्दोसे पयणुयंता ॥*

छा. तत इन्द्रियपरिकर्म कुर्वन्ति विषयसुखनिग्रहसमर्था।
यतनायामप्रमत्ताः रागद्वेषौ प्रतनकुर्वन्तः ॥

मू. (१६५) *पुव्वमकारियजोगा समाहिकामावि मरणकालम्मि।*
*न भवंति परिसहसहा विसयसुहपमोइया अप्पा ॥*

छा. पूर्वमकृतपरिकर्मयोगाः समाधिकामा अपि मरणकाले।
न भवन्ति परीषहसहाः विषयसुखप्रमोदितात्मानः ॥

मू. (१६६) *इंदियसुहसाउलओ घोरपरीसहपराइयपरज्झो।*
*अकयपरिकम्म कीवो मुज्झइ आराहणाकाले ॥*

छा. इन्द्रियसुखसाताकुलो घोरपरीषहपराजितः अपराद्धः (परायत्तः)
अकृतपरिकर्मा क्लीबो मुह्यति आराधनाकाले ॥

मू. (१६७) *बाहंति इंदियाइं पुव्विं दुन्नियमियप्पयाराइं।*
*अकयपरिकम्मकीवं मरणे सुअसंपउत्तंपि ॥*

छा. बाधन्ते इन्द्रियाणि पूर्वं दुर्नियमितप्रचाराणि।
अकृतपरिकर्माणं क्लीबं मरणे स्व(श्रुत)प्रसंयुक्तमपि ॥

मू. (१६८) *आगममयप्पभाविय इंदियसुहलोलुयापइङ्कस्स।*
*जइवि मरणे समाही हुज्ज न सा होइ बहुयाणं ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. आगममयामावितस्य इन्द्रियसुखलोलताप्रतिष्ठस्य ।
यद्यपि मरणे समाधिर्भवेत् न सा भवति बहुकानां ॥

मू. (१६९) *असमत्तसुओऽवि मुणी पुव्विं सुकयपरिकम्मपरिहत्थो ।*
*संजमनियमपइन्नं सुहमत्तहिओ समण्णेइ ॥*

छा. असमाप्तश्रुतोऽपि मुनि पूर्वं सुकृतपरिकर्मनिपुणः ।
संयमनियमप्रतिज्ञां सुखमात्महितः समन्वेति ॥

मू. (१७०) *न चयंति किंचि काउं पुव्विं सुकयपरिकम्मजोगस्स ।*
*खोहं परीसहचमू धिईबलपराइया मरणे ॥*

छा. न शक्नोति किंचित् कर्त्तु पूर्वं सुकृतपरिकर्मयोगस्य ।
क्षोभं परीषहचमूः धृतिबलपराजिता मरणे ॥

मू. (१७१) *तो तेऽवि पुव्वचरणा जयणाए जोगसंगहविहीहिं ।*
*तो ते करिंति दंसणचरित्तसइ भावणाहेउं ॥*

छा. ततस्तेऽपि पूर्वचरणा (भवन्ति) यतनया योगसंग्रहविधिभि ।
ततस्तेऽपि भावनाहेतोर्दर्शनचारित्रस्मृतिं कुर्वन्ति ॥

मू. (१७२) *जा पुव्वभाविया किर होइ सुई चरणदंसणे बहुहा ।*
*सा होइ बीयभूया कयपरिकम्मस्स मरणम्मि ॥*

छा. या पूर्वं भाविता किल भवति श्रुतिश्चरणे दर्शने च बहुधा ।
सा भवति बीजभूता कृतपरिकर्मणो मरणे ॥

मू. (१७३) *तं फासेहि चरित्तं तुमंपि सुहसीलयं पमुत्तूणं ।*
*सव्वं परीसहचमूं अहियासंतो धिइबलेणं ॥*

छा. तत् स्पृश चारित्रं त्वमपि सुखशीलतां प्रमुच्य ।
सर्वां परीषहचमूमध्यासीनो धृतिबलेन ॥

मू. (१७४) *सद्दे रूवे गंधे रसे य फासे य सुविहियजणेहिं ।*
*सव्वेसु कसाएस अ निग्गहपरमो सया होहि ॥*

छा. शब्दे रूपे गन्धे रसे च स्पर्शे च सुविहितजनेषु ।
सर्वेषु कषायेषु च निग्रहपरमः सदा भव ॥

मू. (१७५) *सव्वे रसे पणीए निज्जूहेऊण पंतलुक्खेहिं ।*
*अन्नयरेणुवहाणेण संलिहे अप्पगं कमसो ॥*

छा. सर्वान् रसान् प्रणीतान् निर्यूह्य प्रान्तरूक्षैः ।
अन्यतरेणोपधानेन संलिखेदात्मानं क्रमशः ॥

मू. (१७६) *संलेहणा य दुविहा अब्भिंतरिया य बाहिरा चेव ।*
*अब्भिंतरिय कसाए बाहिरिया होइ य सरीरे ॥*

छा. संलेखना च द्विविधा अभ्यन्तरा च बाह्या चैव ।
अभ्यन्तरा कषाये बाह्या भवति च शरीरे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (१७७) *उग्गमउप्पायणएसणाविसद्धेण अन्नपाणेणं ।*
*मियविरसलुक्खलूहेण दुब्बलं कुणसु अप्पाणं ।।*

छा. उद्‌गमोत्पादनैषणाविशुद्धेन अन्नपानेन ।
मितविरसातिरूक्षेण दुर्बलं कुरुष्वात्मानम् ।।

मू. (१७८) *उल्लीणोल्लीणेहि य अहव न एगंतवद्धमाणेहिं ।*
*संलिह सरीरमेयं आहारविहिं पयणुयंतो ।।*

छा. हीयमानहीयमानैश्चाथवा न एकान्तवर्धमानैः ।
संलिख शरीरमिदं आहारविधिं प्रतनूकुर्वन् ।।

मू. (१७९) *तत्तो अनुपुव्वेणाहारं उवहिं सुओवएसेणं ।*
*विविहतवोकम्मेहि य इंदियविक्कीलियाईहिं ।।*

छा. ततोऽनुपूर्व्याऽऽहारं उपधिं श्रुतोपदेशेन ।
विविधतपःकर्मभिश्च इन्द्रियविक्रीडितादिभिः ।।

मू. (१८०) *तिविहाहिं एसणाहि य विविहेहि अभिग्गहेहिं उग्गेहिं ।*
*संजममविराहिंतो जहाबलं संलिह सरीरं ।।*

छा. त्रिविधाभिरेषणाभिश्च विविधैरभिग्रहैरुग्रैः ।
संयममविराधयन् यथाबलं संलिख शरीरं ।।

मू. (१८१) *विविहाहि व पडिमाहि य बलवीरियजई य संपहोइ सुहं ।*
*ताओवि न बाहिंती जहक्कमं संलिहंतम्मि ।।*

छा. विविधाभिश्च प्रतिमाभिर्वा बलवीर्यं यदि संप्रभवति सुखाय ।
ता अपि न बाधन्ते यथाक्रमं संलिख्यमाने ।।

मू. (१८२) *छम्मासिया जहन्ना उक्कोसा बारिसेव विसाइं ।*
*आयंबिलं महेसी तत्थ य उक्कोसयं बिंति ।।*

छा. षण्मासाञ्जधन्या उत्कृष्टा द्वादशैव वर्षाणि ।
आचाम्लं तत्र च महर्षिरुत्कृष्टं ब्रुवते ।।

मू. (१८३) *छट्ठट्ठमदसमदुवालसेहिं भत्तेहिं चित्तकट्ठेहिं ।*
*मियलहुकं आहारं करेहि आयंबिलं विहिणा ।।*

छा. षष्ठाष्टमदशमद्वादशेभ्यो भक्तेभ्यश्चित्रकष्टेभ्यः ।
मितं लघु आहारं कुरुष्वाचामाम्लं विधिना ।।

मू. (१८४) *परिवड्डिओवहाणो ण्हारुविरावियवियडपासुलिकडीओ ।*
*संलिहियतणुसरीरो अज्झप्परओ मुणी निच्चं ।।*

छा. परिवर्धितोपधानः भग्नस्नायुविकटपांशुलिकटीकः ।
संलिखिततनुशरीरः अध्यात्मरतो मुनिर्नित्यं ।।

मू. (१८५) *एवं सरीरसंलेहणाविहिं बहुविहंपि फासिंतो ।*
*अज्झवसाणविसुद्धिं खणंपि तो मा पमाइत्था ।।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. एवं शरीरसंलेखनाविधिं बहुविधमपि स्पृशन् ।
अध्यवसानविशुद्धिं (प्रति) क्षणमपि ततो मा प्रमादीः ॥

मू. (१८६) *अज्झवसाणविसुद्धीविवज्जिया जे तवं विगिट्ठमवि ।*
*कुव्वंति बाललेसा न होइ सा केवला सुद्धी ॥*

छा. अध्यवसायविशुद्धिविवर्जिता ये तपो विकृष्टमपि ।
कुर्वन्ति बाललेश्या न भवति सा संपूर्णा शुद्धि ॥

मू. (१८७) *एयं सरागसंलेहणाविहिं जइ जई समायरइ ।*
*अज्झप्पसंजुयमई सो पावइ केवलं सुद्धिं ॥*

छा. एनं सरागसंलेखनाविधिं यदि यति समाचरति ।
अध्यात्ममतिसंयुतः स प्राप्नोति केवलां शुद्धिं ॥

मू. (१८८) *निखिला फासेयव्वा सरीरसंलेहणाविही एसा ।*
*इत्तो कसायजोगा अज्झप्पविहिं परम वुच्छं ॥*

छा. निखिलः स्पर्शयितव्यः शरीरसंलेखनाविधिरेषः ।
अतः कषाय योग्यमध्यात्मविधिं परमं वक्ष्ये ॥

मू. (१८९) *कोहं खमाइ मानं मद्दवया अज्जवेण मायं च ।*
*संतोसेण व लोहं निज्जिण चत्तारिवि कसाए ॥*

छा. क्रोधं क्षमया मानं मार्दवेन आर्जवेन मायां च ।
संतोषेण च लोभं निर्जय चतुरोऽपि कषायान् ॥

मू. (१९०) *कोहस्स व माणस्स व मायालोभेसु वा न एएसिं ।*
*वच्चई वसं खणंपि हु दुग्गइगइवड्ढणकराणं ॥*

छा. क्रोधस्य च मानस्य च मायालोभयोश्च नैतेषां ।
व्रजति वशं क्षणमपि दुर्गतिगति (प्राप्ति) वर्धनकराणाम् ॥

मू. (१९१) *एवं तु कसायग्गिं संतोसेणं तु विज्झवेयव्वो ।*
*रागद्दोसपवत्तिं वज्जेमाणस्सविज्झाइ ॥*

छा. एवं तु कषायाग्नि संतोषेण तु विध्यापयितव्यः
रागद्वेषप्रवृत्तिं वर्जयतो विध्याति ॥

मू. (१९२) *जावंति केइ ठाणा उदीरगा हुंति हु कसायाणं ।*
*ते उ सया वज्जंतोविमुत्तसंगो मुणी विहरे ॥*

छा. यावन्ति कानिचित् स्थानानि उदीरकाणि भवन्ति कषायाणां ।
तानि सदा वर्जयन् विमुक्तसंगो मुनिर्विहरेत् ॥

मू. (१९३) *संतोवसंतधिइमं परीसहविहिं व समहियासंतो ।*
*निस्संगयाइ सुविहिय ! संलिहमोहे कसाए य ॥*

छा. शान्त उपशान्त धृतिमान् परीषहविधिं समध्यासयन् ।
निस्संगतया सुविहित ! संलिख कषायान् मोहं च ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (१९४) *इट्ठानिट्ठेसु सया सद्दफरिसरसरूवगंधेहिं ।*
*सुहदुक्खनिव्विसेसो जियसंगपरीसहो विहरे ।।*

छा. इष्टानिष्टेषु सदा शब्दस्पर्शरसरूपगन्धेषु ।
सुखदुःखनिर्विशेषो जितसंगपरीषहो विहरेः ।।

मू. (१९५) *समिईसु पंचसमिओ जिणाहि तं पंच इंदिए सुट्ठु ।*
*तिहिं गारवेहिं रहिओ होह तिगुत्तो य दंडेहिं ।।*

छा. समितिषु पंचसु समितो जय त्वं पंचेन्द्रियाणि सुष्ठु ।
त्रिभिर्गौरवै रहितो भवति त्रिगुप्तश्च दण्डेषु ।।

मू. (१९६) *सन्नासु आसवेसु अ अट्टे रुद्दे अ तं विसुद्धप्पा ।*
*रागद्दोसपवंचे निज्जिणिउं सव्वणोज्जुत्तो ।।*

छा. संज्ञासु आश्रवेषु च आर्त्ते रौद्रे चत्वं विशुद्धात्मन् ! ।
रागद्वेषप्रपंचान् निर्जेतुं सर्वण ! उद्युक्तो ।।

मू. (१९७) *को दुक्खं पाविज्जा ? कस्स य सुक्खेहिं विम्हओ हुज्जा ।*
*को व न लभिज्ज मुक्खं ? रागद्दोसा जइ न हुज्जा ।।*

छा. को दुःखं प्राप्नुवीत ? कस्य वा सौख्यैर्विस्मयो भवेत् ! ।
को वा न लभेत मोक्षं ? रागद्वेषौ यदि न स्याताम् ।।

मू. (१९८) *नवि तं कुणइ अमित्तो सुट्ठु विय विराहिओ समत्थोवि ।*
*जं दोवि अनिग्गहिया करंति रागो य दोसो य ।।*

छा. नैव तत् करोति अमित्रं सुष्ठवपि विराद्धः समर्थोऽपि ।
द्वावपि अनिगृहीतौ कुरुतो रागश्च द्वेषश्च ।।

मू. (१९९) *तं मुयह रागदोसे सेयं चिंतेह अप्पणो निच्चं ।*
*जं तेहिं इच्छह गुणं तं बुज्झह बहुतरं पच्छा ।।*

छा. तत्मुञ्चत रागद्वेषौ श्रेयः चिन्तयतआत्मनो नित्यम् ।
यं ताभ्यामिच्छत गुणं तस्माद्बहुतरं पश्चात् लभध्वं ।।

मू. (२००) *इहलोए आयासं अयसं च करिंति गुणविनासं च ।*
*पसवंति य परलोए सारीरमणोगए दुक्खे ।।*

छा. इह लोके आयासं अयशश्च कुरुतो गुणविनाशं च ।
प्रसुवाते च परलोके च शारीरमनोगतानि दुःखानि ।।

मू. (२०१) *धिद्धी अहो अकज्जं जं जाणंतोऽवि रागदोसेहिं ।*
*फलमउलं कडुयरसं तं चेव निसेवए जीवो ।।*

छा. धिग् धिग् अहो अकार्यं यत् जानानोऽपि रागद्वेषाभ्याम् ।
फलमतुलं कटुकरसं तावेव निषेवते जीवः ।।

मू. (२०२) *तं जइ इच्छसि गंतुं तीरं भवसायरस्स घोरस्स ।*
*तो तवसंजमभंडं सुविहिय ! गिण्हाहि तूरंतो ।।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. तद् यदीच्छसि गन्तुं तीरं भवसागरस्य घोरस्य।
तर्हि तपःसंयमभाण्डं सुविहित ! गृहाण त्वरमाणः ।।

मू. (२०३) *बहुभयकरदोसाणं सम्मत्तचरित्तगुणविणासाणं।*
*न हु वसमागंतव्वं रागद्दोसाण पावाणं ।।*

छा. बहुभयङ्करदोषयोः सम्यक्त्वचारित्रगुणविनाशकयोः।
न वशमगन्तव्यं रागद्वेषयोः पापयोः ।।

मू. (२०४) *जं न लहइ सम्मत्तं लद्धूणवि जं न एइ वेरग्गं।*
*विसयसुहेसु य रज्जइ सो दो सो रागदोसाणं ।।*

छा. यन्न लभते सम्यक्त्वं लब्ध्वाऽपि यत् नैति वैराग्यम्।
विषयसुखेषु च रज्यति स दोषो रागद्वेषयोः ।।

मू. (२०५) *भवसयसहस्सदुलहे जाइजरामरणसागरुत्तारे।*
*जिनवयणम्मि गुणागर ! खणमवि मा काहिसि पमायं ।।*

छा. भवशतसहस्रदुर्लभे जातिजरामरणसागरोत्तारे।
जिनवचने गुणाकर ! क्षणमपि मा कार्षी प्रमादम् ।।

मू. (२०६) *दव्वेहिं पज्जवेहि य ममत्तसंगेहिं सुट्ठुवि जियप्पा।*
*निप्पणयपेमरागो जइ सम्मं नेइ मुक्खत्थं ।।*

छा. द्रव्यैः पर्यायैश्च ममत्वसंगैश्च सुष्ठ्वपि जितात्मा स्यात्।
निष्प्रणयप्रेमरागो यदि सम्यग् प्राप्नोति मोक्षार्थम् ।।

मू. (२०७) *एवं कयसंलेहं अब्भिंतरबाहिरम्मि संलेहे।*
*संसारमुक्खबुद्धी अनियाणो दानि विहराहि ।।*

छा. एवमभ्यन्तरबाह्यसंलेखनया कृतसंलेखनः।
संसारमोक्षबुद्धिरनिदान इदानीं विहर ।।

मू. (२०८) *एवं कहिय समाही तहविह संवेगकरणगंभीरो।*
*आउरपच्चक्खाणं पुनरवि सीहावलोएणं ।।*

छा. एवं कथितसमाधिकस्तथाविधसंवेगकरणगंभीरः।
आतुरप्रत्याख्यानं पुनरपि सिंहावलोकेन (करोति) ।।

मू. (२०९) *न हु सा पुनरुत्तविही जा संवेगं करेइ भण्णंती।*
*आउरपच्चक्खाणे तेण कहा जोइया भुज्जो ।।*

छा. नैव स विधि पुनरुक्तः (स्याद्) यः संवेगं भण्यमानः करोति।
आतुरप्रत्याख्याने तेन कथा योजिता भूयः ।।

मू. (२१०) *एस करेमि पणामं तित्थयराणं अनुत्तरगईणं।*
*सव्वेसिं च जिणाणं सिद्धाणं संजयाणं च ।।*

छा. एष करोमि प्रणामं तीर्थकरेभ्यः अनुत्तरगतिभ्यः।
सर्वेभ्यश्च जिनेभ्यः सिद्धेभ्यः संयतेभ्यश्च ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (२११) *जं किंचिवि दुच्चरियं तमहं निंदामि सव्वभावेणं ।*
*सामाइयं च तिविहं तिविहेण करेमऽणागारं ।।*

छा. यतकिंचिदपि दुश्चरितंतदहं निन्दामि सर्वभावेन ।
सामायिकं च त्रिविधं त्रिविधेन करोम्यनाकारं ।।

मू. (२१२) *अब्भितरं च तह बाहिरं च उवहीं सरीर साहारं ।*
*मणवयणकायतिकरणसुद्धोऽहं मित्ति पकरेमि ।।*

छा. अभ्यन्तरं च तथा बाह्यं च उपधिं शरीरं साहारं ।
मनोवचनकायैः त्रिकरणशुद्धोऽहं प्रकरोमि इति ।।

मू. (२१३) *बंधपओसं हरिसं रइमरइं दीणयं भयं सोगं ।*
*रागद्दोस विसायं उस्सुगभावं च पयहामि ।।*

छा. बन्धं प्रद्वेषं हर्षं रतिमरतिं दीनतां भयं शोकं ।
रागद्वेषौ विषादं उत्सुकभावं च प्रजहामि ।।

मू. (२१४) *रागेण व दोसेण व अहवा अकयन्नुया पडिनिवेसेणं ।*
*जो मे किंचिवि भणिओ तमहं तिविहेण खामेमि ।।*

छा. रागेण वा द्वेषेण वा अथवा अकृतज्ञतया प्रतिनिवेशेन यो
मया किञ्चिदपि भणितः तमहं त्रिविधेन क्षमयामि ।।

मू. (२१५) *सव्वेसु य दव्वेसु य उवट्ठिओ एस निम्ममत्ताए ।*
*आलंबणं च आया दंसणनाणे चरित्ते य ।।*

छा. सर्वेषु च द्रव्येषु च निर्ममत्वाय एष उपस्थितः ।
आलम्बनं चात्मा दर्शनज्ञाने चारित्रं च ।।

मू. (२१६) *आया पच्चक्खाणे आया मे संजमे तवे जोगो ।*
*जिनवयणविहिविलग्गो अवसेसविहिं तु दंसेहि ।।*

छा. आत्मा प्रत्याख्यानं आत्मा मे संयमस्तपः योगः ।
जिनवचनदिधिविलग्नः अवशेषविधिं तु दर्शय ।।

मू. (२१७) *मूलगुण उत्तरगुणा जे मे नाराहिया पमाएणं ।*
*ते सव्वे निंदामि पडिक्कमे आगमिस्साणं ।।*

छा. मूलगुणा उत्तरगुणा ये मया नाराद्धाः प्रमादेन ।
तान् सर्वान् निन्दामि प्रतिक्राम्यामि आगमिष्यद्‌भयः ।।

मू. (२१८) *एगो सयंकडाइं आया मे नाणदंसणवलक्खो ।*
*संजोगलक्खणा खलु सेसा मे बाहिरा भावा ।।*

छा. एकः स्वयं कृतानि (भुङ्क्ते) आत्मा मे ज्ञानदर्शनवलक्षः ।
संयोगलक्षणाः खलु शेषा बाह्या भावाः ।।

मू. (२१९) *पत्ताणि दुहसयाइं संजोगस्सा(वसा)णुएण जीवेणं ।*
*तम्हा अनंतदुक्खं चयामि संजोगसंबंधं ।।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. प्राप्तानि दुःखशतानि संयोगवशानुगेन जीवेन ।
तस्मादनन्तदुःखं त्यजामि संयोगसम्बन्धं ।।

मू. (२२०) *अस्संजममण्णाणं मिच्छत्तं सव्वओ ममत्तं च ।*
*जीवेसु अजीवेसु य तं निंदे तं च गरिहामि ।।*

छा. असंयममज्ञानं मिथ्यात्वं सर्वेषु जीवेषु
अजीवेषु च ममत्वं तन्निन्दामि तच्च गर्हे

मू. (२२१) *परिजाणे मिच्छत्तं सव्वं अस्संजमं अकिरियं च ।*
*सव्वं चेव ममत्तं चयामि सव्वं च खामेमि ।।*

छा. परिजानामि मिथ्यात्वं सर्वमसंयममक्रियां च ।
सर्वमेव ममत्त्वं त्यजामि सर्वं च क्षमयामि ।।

मू. (२२२) *जे मे जाणंति जिणा अवराहा जेसु जेसु ठाणेसु ।*
*ते तह आलोएमि उवट्ठिओ सव्वभावेणं ।।*

छा. यान् मम जानन्ति जिना अपराधान् येषु २ स्थानेषु
ताँस्तथाऽऽलोचयामि उपस्थितः सर्वभावेन ।।

मू. (२२३) *उप्पन्ना उप्पन्ना माया अणुमग्गओ निहंतव्वा ।*
*आलोयणनिंदणगरिहणाहिं न पुणोत्ति य बिइयं ।।*

छा. उत्पन्ना उत्पन्ना माया अनुमार्गतो निहन्तव्या ।
आलोचननिन्दनागर्हाभि न पुनरिति च द्वितीयम् ।।

मू. (२२४) *जह बालो जंपंतो कज्जमकज्जं च उज्जुयं भणइ ।*
*तं तह आलोयव्वं मायं मुत्तूण निस्सेसं ।।*

छा. यथा बालो जल्पन् कार्यमकार्यं च ऋजुकं भणति ।
तत्तथा आलोचयितव्यं मायां मुक्त्वा निशेषाम् ।।

मू. (२२५) *सुबहुंपि भावसल्लं आलोएऊण गुरुसगासम्मि ।*
*निस्सल्लो संथारं उवेइ आराहओ होइ ।।*

छा. सुबह्वपि भावशल्यमालोच्य गुरुसकाशे ।
निशल्यः संस्तारकमुपैति आराधको भवति ।।

मू. (२२६) *अप्पंपि भावसल्लं जे आलोयंति गुरुसणासम्मि ।*
*धंतंपि सुयसमिद्धा न हु ते आराहगा हुंति ।।*

छा. अल्पमपि भावशलयं ये नालोचयंति गुरुसकाशे ।
बाढमपि श्रुतसमृद्धा नैव त आराधका भवन्ति ।।

मू. (२२७) *नवि तं विसं च सत्थं च दुप्पउत्तो व कुणइ वेयालो ।*
*जंतं व दुप्पउत्तं सप्पो व पमायओ कुविओ ।।*

छा. नैव तत् विषं च शस्त्र च दुष्प्रयुक्तो वा करोति वैताः ।
यन्त्रं वा दुष्प्रयुक्तं सर्पो वा प्रमादतः कुपितः ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (२२८) *जं कुणइ भावसल्लं अणुद्धियं उत्तमट्ठकालम्मि ।*
*दुल्लहबोहीयत्तं अनंतसंसारियत्तं च ॥*

छा. यत्करोति भावशल्यं अनुध्धृ तं उत्तमार्थकाले ।
दुर्लभबोधिकत्वं अनन्तसंसारिकत्वं च ॥

मू. (२२९) *तो उद्धरंति गारवरहिया मूलं पुनब्भवलयाणं ।*
*मिच्छादंसणसल्लं मायासल्लं नियाणं च ॥*

छा. तत उद्धरन्ति गौरवरहिता मूलं पुनर्भवलतानां ।
मिथ्यादर्शनशल्यं मायाशल्यं निदानं च ॥

मू. (२३०) *कयपावोऽवि मणूसो आलोइय निंदिय गुरुसगासे ।*
*होइ अइरेगलहुओ ओहरियभरुव्व भारवहो ॥*

छा. कृतपापोऽपि मनुष्यः गुरुसकाशे आलोच्य निन्दयित्वा ।
भवत्यतिरेकलघुः उत्तारितभर इव भारवाट् ॥

मू. (२३१) *तस्स य पायच्छित्तं जं मग्गविऊ गुरू उवइसंति ।*
*तं तह अनुचरियव्वं अनवत्थपसंगभीएणं ॥*

छा. तस्य च प्रायश्चित्तं यन्मार्गविदो गुरवः उपदिशन्ति ।
तत्तथा अनुचरितव्यं अनवस्थाप्रसङ्गभीतेन ॥

मू. (२३२) *दसदोसविप्पमुक्कं तम्हा सव्वं अमग्ग माणेणं ।*
*जं किंचि कयमकज्जं आलोए तं जहावत्तं ॥*

छा. दशदोषविप्रमुक्तं तस्मात् सर्वमगूहयता ।
यत्किञ्चिदपि अकार्यं कृतं तद्यथावृत्तमालोचयेत् ॥

मू. (२३३) *सव्वं पाणारंभं पच्चक्खामित्ति अलियवयणं च ।*
*सव्वं अदिन्नदाणं अब्बंभपरिग्गहं चेव ॥*

छा. सर्वं प्राणारम्भं प्रत्याख्यामीति चालीकवचनं च ।
सर्वमदत्तादानमब्रह्म परिग्रहं चैव ॥

मू. (२३४) *सव्वं च असनपानं चउव्विहं जा य बाधिरा उवही ।*
*अब्भिंतरं च उवहिं जावज्जीवं वोसिरामि ॥*

छा. सर्वं च अशनपानं चतुर्विधः यश्च बाह्योपधिः ।
अभ्यन्तरं च उपधिं यावज्जीवं व्युत्सृजामि ॥

मू. (२३५) *कंतारे दुब्भिक्खे आयंके वा महया समुप्पन्ने ।*
*जं पालियं न भग्गं तं जाणसु पालणासुद्धं ॥*

छा. कान्तारे दुर्भिक्षे आतङ्के वा महति समुत्पन्ने ।
यत्पालितं न भग्नं तत् जानीहि पालनाशुद्धम् ॥

मू. (२३६) *रागेण व दोसेण व परिणामेण व न दूसियं जं तु ।*
*तं खलु पच्चक्खाणं भावविसुद्धं मुणेयव्वं ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. रागेण वा द्वेषेण वा परिणामेन वा न दूषितं यत्तु ।
तत्खलु प्रत्याख्यानं भावविशुद्धं ज्ञातव्यम् ॥

मू. (२३७) *पीयं थणअच्छीरं सागरसलिलाउ बहुयरं हुज्ञा ।*
*संसारे संसरंतो माऊणं अन्नमन्नाणं ॥*

छा. पीतं स्तनक्षीरं सागरसलिलाद् बहुतरं भवेत् ।
संसारे संसरता मातॄणां अन्यान्यासाम् ॥

मू. (२३८) *नत्थि किर सो पएसो लोए वालग्गकोडिमित्तोऽवि ।*
*संसारे संसरंतो जत्थ न जाओ मओ वाऽवि ॥*

छा. नास्ति किल स प्रदेशो लोके वालाग्रकोटीमात्रोऽपि ।
संसारे संसरन् यत्र न जातो मृतो वाऽपि ॥

मू. (२३९) *चुलसीई किर लोए जोणीणं पमुह सयसहस्साइं ।*
*इक्किक्कंमि य इत्तो अनंतखुत्तो समुप्पन्नो ॥*

छा. चतुरशीति किल लोके योनिप्रमुखाणि शतसहस्राणि ।
एकैकस्मिंश्चेतोऽनन्तकृत्वः समुत्पन्नः ॥

मू. (२४०) *उड्ढमहे तिरियम्मि य मयाणि बालमरणाणिऽनंताणि ।*
*तो ताणि संभरंतो पंडियमरणं मरीहामि ॥*

छा. ऊर्ध्वमधस्तिरश्चि च मृतानि बालमरणानि अनन्तानि ।
ततस्तानि स्मरन् पण्डितमरणं मरिष्ये ॥

मू. (२४१) *माया मित्ति पिया मे भाया भज्ञत्ति पुत्त धूया य ।*
*एयाणिऽचिंतयंतो पंडियमरणं मरीहामि ॥*

छा. माता मे इति पिता मे भ्राता भार्या इति पुत्रो दुहिता च ।
एतानि अचिन्तयन् पण्डितमरणं मरिष्ये ॥

मू. (२४२) *मायापिइबंधूहिं संसारत्थेहिं पूरिओ लोगो ।*
*बहुजोणिनिवासीहिंन य ते ताणं च सरणं च ॥*

छा. मातापितृबन्धुभिः संसारस्थैः पूरितो लोकः ।
बहुयोनिनिवासिभिर्न च ते त्राणं च शरणं च ॥

मू. (२४३) *इक्को जायइ मरइ इक्को अणुहवइ दुक्कयविवागं ।*
*इक्को अनुसरइ जीओ जरमरणचउग्गईगुविलं ॥*

छा. एको जायते म्रियते एकोऽनुभवति दुष्कृतविपाकं ।
एकोऽनुसरति जीवो जराभरणचतुर्गतिगुपिलं ॥

मू. (२४४) *उव्वेवणयं जम्मणमरणं नरएसु वेयणाओ य ।*
*एयाणि संभरंतो पंडियमरणं मरीहामि ॥*

छा. उद्वेजकं जन्ममरणं नरकेषु वेदनाश्च ।
एताः स्मरन् पण्डिमरणं मरिष्ये ॥

मू. (२४५) *इक्कं पंडियमरणं छिंदइ जाईसयाणि बहुयाणि ।*
*तं मरणं मरियव्वं जेण मओ सुम्मओ होइ ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. एकं पण्डितमरणं छिनत्ति जातिशतानि बहुकानि ।
तेन मरणेन मर्त्तव्यं येन मृतः सुमृतः भवति ॥

मू. (२४६) *कइया णु तं सुमरणं पंडियमरणं जिणेहि पन्नत्तं ।*
*सुद्धो उद्धियसल्लो पाओवगमं मरीहामि ।*

छा. कदा तत् सुमरणं पण्डितमरणं जिनैः प्रज्ञप्तम् ।
शुद्ध उध्धृतशल्यः पादपोपगतो मरिष्ये ॥

मू. (२४७) *संसारचक्कवाले सव्वेऽवि य पुग्गला मए बहुसो ।*
*आहारिया य परिणामिया य न य तेसु तित्तोऽहं ॥*

छा. संसारचक्रवाले सर्वेऽपि च पुद्गला मया बहुशः ।
आहारिताश्च परिणामिताश्च न च तैस्तृप्तोऽहं ॥

मू. (२४८) *आहारनिमित्तेणं मच्छा वच्चंतिऽनुत्तरं नरयं ।*
*सच्चित्ताहारविहिं तेण उ मणसाऽवि निच्छामि ॥*

छा. आहारनिमित्तेन मत्स्या व्रजन्ति अनुत्तरं नरकं ।
सचित्ताऽऽहारविधिं तेन तु मनसापि नेच्छामि ॥

मू. (२४९) *तणकट्ठेण व अग्गी लवणसमुद्दो नईसहस्सेहिं ।*
*न इमो जीवो सक्को तिप्पेउं कामभोगेहिं ॥*

छा. तृणकाष्ठैरग्निरिव नदीसहस्र लवणसमुद्र इव ।
नायं जीवः शक्यः तर्पयितुं कामभोगैः ॥

मू. (२५०) *लवणयमुहसामाणो दुप्पूरो धणरओ अपरिमिज्जो ।*
*न हु सक्को तिप्पेउं जीवो संसारियसुहेहिं ॥*

छा. लवणमुखसमानः दुष्पूरः धनरयोऽपरिमेयः ।
नैव शक्यः तर्पयितुं जीवः संसारिकसुखैः ॥

मू. (२५१) *कप्पतरुसंभवेसु य देवुत्तरकुरुवंसपसूएसुं ।*
*परिभोगेण न तित्तो न य नरविज्जाहरसुरेसुं ॥*

छा. कल्पतरुसम्भवैः देवकुरूत्तरकुरूप्रसूतैः ।
परिभोगैर्न तृप्तः न च नरविद्याधरसुरभवजैः ॥

मू. (२५२) *देविंदचक्कवट्टित्तणाइं रज्जाइं उत्तमा भोगा ।*
*पत्ता अनंतखुत्तो न यऽहं तित्तिं गओ तेहिं ॥*

छा. देवेन्द्रचक्रवर्त्तित्वानि राज्यानि उत्तमा भोगाः ।
प्राप्ता अनन्तकृत्वः न चाहं तृप्तिगतस्तैः ॥

मू. (२५३) *पयक्खीरुच्छुरसेसु य साऊसु महोदहीसु बहुसोवि ।*
*उववन्नो न य तण्हा छिन्ना ते सीयलजलेहिं ॥*

छा. पयक्षीरेक्षुरसेषु च स्वादुषु महोदधिषु बहुशोऽपि ।
उत्पन्नो न च तृष्णा छिन्ना तव शीतलजलैः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (२५४) *तिविहेणवि सुहमउलं जम्हा कामरइविसयसुक्खाणं ।*
*बहुसोऽवि समनुभूयं न य तु तण्हा परिच्छिण्णा ॥*

छा. त्रिविधेनापि सुखमतुलं यस्मात् कामरतिविषयसौख्यैः ।
बहुशोऽपि समनुभूतं न च तव तृष्णा परिच्छिन्ना ॥

मू. (२५५) *जा काइ पत्थणाओ कया मए रागदोसवसएणं ।*
*पडिबंधेण बहुविहा तं निंदे तं च गरिहामि ॥*

छा. या काचित् प्रार्थना कृता मया रागद्वेषवशगेन
प्रतिबन्धेन बहुविधा तां निन्दे तां च गर्हे ॥

मू. (२५६) *हंतूण मोहजालं छित्तूण य अट्ठकम्मसंकलियं ।*
*जम्मणमरणऽरहट्टं भित्तूण भवा णु मुच्चिहिसि ॥*

छा. हत्वा मोहजालं छित्वा चाष्टकर्म्मश्रृङ्खलां ।
जन्ममरणारहट्टं भित्वा भवाद् मुच्यसे ॥

मू. (२५७) *पंच य महव्वयाइं तिविहं तिविहेण आरुहेऊणं ।*
*मनवयणकायगुत्तो सज्जो मरणं पडिच्छिज्जा ॥*

छा. पञ्च च महाव्रतानि त्रिविधं त्रिविधेनारोह्य ।
मनोवचनकायगुप्तः सद्यो मरणं प्रतीप्सेत् ॥

मू. (२५८) *कोहं माणं मायं लोहं पिज्जं तहेव दोसं च ।*
*चइऊण अप्पमत्तो रक्खामि महव्वए पंच ॥*

छा. क्रोधं मानं मायां लोभं प्रेम तथैव द्वेषं च ।
त्यक्त्वा अप्रमत्तः रक्षामि महाव्रतानि पञ्च ॥

मू. (२५९) *कलहं अब्भक्खाणं पेसुन्नंपि य परस्स परिवायं ।*
*परिवज्जिंतो गुत्तो रक्खामि महव्वए पंच ॥*

छा. कलहं अभ्याख्यानं पैशून्यमपि च परस्य परिवादं ।
परिवर्जयन् गुप्तः रक्षामि महाव्रतानि पञ्च ॥

मू. (२६०) *किण्हा नीला काऊ लेसं झाणाणि अप्पसत्थाणि ।*
*परिवज्जिंतो गुत्तो रक्खामि महव्वए पंच ॥*

छा. कृष्णां नीलां कापोतीं लेश्यां ध्याने अप्रशस्ते । परि० ॥

मू. (२६१) *तेऊ पम्हं सुक्कं लेसा झाणाणि सुप्पसत्थाणि ।*
*उवसंपन्नो जुत्तो रक्खामि महव्वए पंच ॥*

छा. तैजसीं पद्मां शुक्लां लेश्यां ध्याने सुप्रशस्ते उपसम्पन्नो युक्तः० ॥

मू. (२६२) *पंचिंदियसंवरणं पंचेव निरुंभिऊण कामगुणे ।*
*अच्चासायणविरओ रक्खामि महव्वए पंच ॥*

छा. पञ्चेन्द्रियसंवरणं पञ्चव निरुद्धय काम गुणान् ।
अत्याशातनाविरतः० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (२६३) *सत्तभयविप्पमुक्को चत्तारि निरुंभिऊण य कसाए ।*
*अट्ठमयट्ठाणजढो रक्खामि महव्वए पंच ॥*

छा. सप्तभयविप्रमुक्तः चतुरो निरुध्य च कषायान् । त्यक्ताष्टमदस्थानः० ॥

मू. (२६४) *मनसा मणसच्चविऊवायासच्चेण करणसच्चेण ।*
*तिविहेण अप्पमत्तो रक्खामि महव्वए पंच ॥*

छा. मनसा मनःसत्यवित् वाचासत्येन करणसत्येन (युक्तः) त्रिविधेनाप्यप्रमत्तः०

मू. (२६५) *एवं तिदंडविरओ तिकरणसुद्धो तिसल्लनिस्सल्लो ।*
*तिविहेण अप्पमत्तो रक्खामि महव्वए पंच ॥*

छा. एवं त्रिदण्डविरतः त्रिकरणशुद्धः त्रिशल्यनिशल्य ।
त्रिविधेनाप्रमत्तः० ॥

मू. (२६६) *सम्मत्तं समिइओ गुत्तीओ भावनाओ नाणं च ।*
*उवसंपन्नो जुत्तो रक्खामि महव्वए पंच ॥*

छा. सम्यक्त्वं समितीः गुप्तीः भावना ज्ञानं च ।
उपसम्पन्नो युक्तः० ॥

मू. (२६७) *संगं परिजाणामि सल्लंपि य उद्धरामि तिविहेणं ।*
*गुत्तीओ समिईओ मज्झं ताणं च सरणं च ॥*

छा. सङ्गं परिजानामि शल्यमपि चोद्धरामि त्रिविधेन ।
गुप्तयः समितयः मम त्राणं शरणं च ॥

मू. (२६८) *जह खुहियचक्कवाले पोयं रयणभरियं समुद्दम्मि ।*
*निज्ञामया धरिंती कयरय(कर)ना बुद्धिसंपन्ना ॥*

छा. यथा क्षुभितचक्रवाले समुद्रे रत्नभृतं पोतं ।
निर्यामका धारयन्ति कृतरचनाः बुद्धिसम्पन्नाः ॥

मू. (२६९) *तवपोअं गुणभरियं परीसहुम्मीहि धणियमाइद्धं ।*
*तह आराहिंति विऊ उवएसऽवलंबगा धीरा ॥*

छा. तपःपोतं गुणभृतं परीषहोर्मिभि बाढमाविष्टम् ।
उपदेशावलम्बका धीराः विदः तथाऽऽराधयन्ति ॥

मू. (२७०) *जइ ताव ते सुपुरिसा आयारोवियभरा निरवयक्खी ।*
*गिरिकुहरकंदरगया साहंति य अप्पणो अट्ठं ॥*

छा. यदि तावत्ते सुपुरुषा आत्मारोपितभाराः
निरपेक्षा गिरिकुहरकन्दरागताः साधयन्ति चात्मनोऽर्थम् ॥

मू. (२७१) *जइ ताव सावयाकुलगिरिकंदरविसमदुग्गमग्गेसु ।*
*धिइधणियबद्धकच्छा साहंति य उत्तमं अट्ठं ॥*

छा. यदि तावद् श्वापदाकुलगिरिकन्दराविषमदुर्गमार्गेषु ।
बाढं धृतिबद्धकच्छाः उत्तमार्थं साधयन्ति ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (२७२) *किं पुण अनगारसहायगेण वेरग्गसंगहबलेणं ।*
*परलोएण न सक्का संसारमहोदहिं तरिउं ॥*

छा. किं पुनरगारसहायकेन वैराग्यसङ्ग्रहबलेनापरलोकेन
न शक्यः संसारमहोदधिस्तरीतुम् ॥

मू. (२७३) *जिनवयणमप्पमेयं महुरं कन्नामयं सुणंताणं ।*
*सक्का हु साहुमज्झा साहेउं अप्पणो अट्ठं ॥*

छा. जिनवचनमप्रमेयं मधुरं कर्णामृतं श्रृण्वता साधुमध्ये
आत्मनोऽर्थ साधयितुं ?, शक्य एव ॥

मू. (२७४) *धीरपुरिसपन्नत्तं सप्पुरिसनिसेवियं परमघोरं ।*
*धन्ना सिलातलगया साहिंती अप्पो अट्ठं ॥*

छा. धीरपुरुषप्रज्ञप्तं सत्पुरुषनिसेवितं परमघोरं ।
आत्मनोऽर्थं धन्याः शीलातलगताः साधयन्ति ॥

मू. (२७५) *बाहेइ इंदियाइं पुव्वमकारियपइट्ठचारिस्स ।*
*अकयपरिकम्म कीवं मरणेसु अ संपउत्तंमि ॥*

छा. बाधयन्ति इन्द्रियाणि पूर्वं अकारितप्रतिष्ठाचारितस्य
अकृतपरिकर्म्माणं क्लीबं मरणे सम्प्रयुक्ते ॥

मू. (२७६) *पुव्वमकारियजोगो समाहिकामोऽवि मरणकालम्मि ।*
*न भवइ परीसहसहो विसयसुहपराइओ जीवो ॥*

छा. पूर्वमकृतयोगः समाधिकामोऽपि मरणकाले ।
न भवति परीषहसहः विषयसुखपराजितो जीवः ॥

मू. (२७७) *पुव्विं कारियजोगो समाहिकामो य मरणकालम्मि ।*
*होइ उ परीसहसहो विसयसुहनिवारिओ जीवो ॥*

छा. पूर्वं कृतयोगः समाधिकामश्च मरणकाले ।
भवति तु परीषहसहः निवारितविषयसुखः जीवः ॥

मू. (२७८) *पुव्विं कारियजोगो अनियाणो ईहिऊण सुहभावो ।*
*ताहे मलियकसाओ सज्जो मरणं पडिच्छिज्जा ॥*

छा. पूर्वं कृतयोगः अनिदानः शुभभावान् ईहयित्वा ।
तदा मर्दितकषायः सद्यो मरणं प्रतीप्सेत् ॥

मू. (२७९) *पावाणं पावाणं कम्माणं अप्पणो सकम्माणं ।*
*सक्का पलाइउं जे तवेण सम्मं पउत्तेणं ॥*

छा. पापानामपि पापेभ्यः कर्मभ्यः आत्मा स्वकृतेभ्यः ।
शक्यः पलायितुं तपसा सम्यक् प्रयुक्तेन ॥

मू. (२८०) *इक्कं पंडियमरणं पडिवज्जइ सुपुरिसो असंभंतो ।*
*खिप्पं सो मरणाणं काहिइ अंतं अनंताणं ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा.　एकं पण्डितमरणं प्रतिपद्यते सुपुरुषः असंभ्रान्तः ।
क्षिप्रं सः अनन्तानां मरणानामन्तं करोति ॥

मू. (२८१)　*किं तं पंडियमरणं ? काणि व आलंबणाणि भणियाणि ।*
*एयाइं नाऊणं किं आयरिया पसंसंति ॥*

छा.　किं तत् पण्डितमरणं कानि वाऽऽलम्बनानि भणितानि ।
एतानि ज्ञात्वा किं आचार्या प्रशंसन्ति ।.

मू. (२८२)　*अनसनपाउवगमणं आलंबण झाण भावनाओ अ ।*
*एयाइं नाऊणं पंडियमरणं पसंसंति ॥*

छा.　अनशनं पादोपगमनं आलम्बनानि ध्याने भावनाश्च
एतानि ज्ञात्वा पण्डितमरणं प्रशंसन्ति ॥

मू. (२८३)　*इंदियसुहसाउलओ घोरपरीसहपराइयपरज्झो ।*
*अकयपरिकम्म कीवो मुज्झइ आराहणाकाले ॥*

छा.　इन्द्रियसुखसाताकुलः घोरपरीषहपराजितः परायत्तः ।
अकृतपरिकर्म्मा क्लीबः मुह्यति आराधनाकाले ॥

मू. (२८४)　*लज्जाइ गारवेणं बहुसुयमएण वावि दुच्चरियं ।*
*जे न कहिंति गुरूणं न हु ते आराहगा हुंति ॥*

छा.　लज्जया गौरवेण बहुश्रुमदेन वा दुश्चरितमपि ।
ये न कथयन्ति गुरुभ्यः नैव तयाराधका भवन्ति ॥

मू. (२८५)　*सुज्झइ दुक्करकारी जाणइ मग्गंति पावए कित्तिं ।*
*विणिगूहिंतो निंदं तम्हा आलोयणा सेया ॥*

छा.　शुद्धयति दुष्करकारी जानाति मार्गमिति प्राप्नोति कीर्त्तिम् ।
विनिगूहयन् निन्दां तस्मादालोचना श्रेयसी ॥

मू. (२८६)　*अग्गिम्मि य उदयम्मि य पाणेसु य पाणबीयहरिएसुं ।*
*होइ मओ संथारो पडिवज्जइ जो(जइ) असंभंतो ॥*

छा.　अग्नौ च उदके च प्राणेषु च प्राणबीजहरितेषु ।
भवति मृतस्य संस्तारकः प्रतिपद्यते यदि असंभ्रान्तः ॥

मू. (२८७)　*नवि कारणं तणमओ संथारो नवि य फासुया भूमी ।*
*अप्पा खलु संथारो होइ विसुद्धो मरंतस्स ॥*

छा.　नैव कारणं तृणमयः संस्तारकः नापि च प्रासुका भूमि ।
आत्मा खलु संस्तारको भवति विशुद्धो म्रियमाणस्य ॥

मू. (२८८)　*जिनवयणमणुगया मे होउ मई झाणजोगमल्लीणा ।*
*जह तम्मि देसकाले अमूढसन्नो चएं देहं ॥*

छा.　जिनवचनानुगता ध्यानयोगाश्रिता मम मतिर्भवतु ।
यथा तस्मिन्नवसरेऽमूढसंज्ञो देहं त्यजेयम् ॥

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

मू. (२८९) *जाहे होइ पमत्तो जिनवयणरहिओ अणायत्तो ।*
*ताहे इंदियचोरा करेंति तवसंजमविलोमं ॥*

छा. यदा भवति प्रमत्तः जिनवचनरहितः परायत्तः ।
तदा इन्द्रियचौराः कुर्वन्ति तपःसंयमप्रातिकूल्यम् ॥

मू. (२९०) *जिनवयणमनुगयमई जंवेलं होइ संवरपविट्ठो ।*
*अग्गी य वायसहिओ समूलडालं डहइ कम्मं ॥*

छा. जिनवचनानुगतमति यस्यां वेलायां भवति संवरप्रविष्टः ।
वातसहितः अग्निरिव समूलडालं कर्म्म दहति ॥

मू. (२९१) *जह डहइ वायसहिओ अग्गी हरिएवि रुक्खसंघाए ।*
*तह पुरिसकारसहिओ नाणी कम्मं खयं नेइ ॥*

छा. यथा वातसहितोऽग्नि हरितानपि वृक्षसङ्घातान् ।
दहति तथा पुरुषकारसहितो ज्ञानी कर्म्म क्षयं नैति ॥

मू. (२९२) *जह अग्गिंमि व पबले खडपूलिय खिप्पमेव झामेइ ।*
*तह नाणीवि सकम्मं खवेइ ऊसासमित्तेणं ॥*

छा. यथा प्रबलोऽग्नि तृणपुलिकान् क्षिप्रमेव ध्मायति ।
तथा ज्ञान्यपि उच्छ्वासमात्रेण स्वकर्म्म क्षपयति ॥

मू. (२९३) *न हु मरणम्मि उवग्गे सक्को बारसविहो सुयक्खंधो ।*
*सव्वो अनुचिंतेउं धंतंपि समत्थचित्तेणं ॥*

छा. नैव मरणे समीपगे शक्यो द्वादशविधः श्रुतस्कन्धः ।
सर्वोऽनुचिन्तयितुं बाढमपि समर्थचित्तेन ॥

मू. (२९४) *इक्कम्मिवि जंमि पए संवेगं कुणइ वीयरागमए ।*
*वच्चइ नरो अविग्घं तं मरणं तेण मरितव्वं ॥*

छा. एकस्मिन्नपि यस्मिन् पदे संवेगं करोति वीतरागमार्गे ।
व्रजति च नरोऽविघ्नं तन्मरणं तेन मर्त्तव्यम् ॥

मू. (२९५) *इक्कम्मिवि जम्मि पए संवेगं कुणइ वीयरागमए ।*
*सो तेण मोहजालं छिंदइ अज्झप्पओगेणं ॥*

छा. एकस्मिन्० । सः तेन मोहजालं छिनत्ति अध्यात्मयोगेन ॥

मू. (२९६) *जेण विरागो जायइ तं तं सव्वायरेण करणिज्जं ।*
*मुच्चइ हु ससंवेगी अणंतओ होइ असंवेगी ॥*

छा. येन विरागो जायते तत् तत् सर्वादरेण कर्त्तव्यम् ।
मुच्यते एव ससंवेगः असंवेगोऽनन्तको भवति ॥

मू. (२९७) *धम्मं जिनपन्नत्तं सम्मत्तमिणं सद्दहामि तिविहेणं ।*
*तसबायरभूयहियं पंथं निव्वाणमग्गस्स ॥*

छा. धर्म्मं जिनप्रज्ञप्तं इदं सम्यक्त्वं च श्रद्दधामि त्रिविधेन ।
त्रसबादरभूतहितं पन्थानं निर्वाणमार्गस्य ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (२९८) *समणोऽहंति य पढमं बीयं सव्वत्थ संजओमित्ति ।*
*सव्वं च वोसिरामी जिणेहिं जं जं पडिक्कुट्ठं ॥*

छा. श्रमणोऽहमिति च प्रथमं द्वितीयं सर्वत्र संयतोऽस्मीति ।
सर्वं च व्युतसृजामि जिनैः यद् यद् प्रतिकुष्टम् ॥

मू. (२९९) *मणसावि अचिंतणिज्जं सव्वं भासाइ अभासणिज्जं च ।*
*काएण य अकरणिज्जं वोसिरि तिविहेण सावज्जं ॥*

छा. मनसाप्यचिन्तनीयं सर्वं भाषयाऽभाषणीयं च ।
कायेन चाकरणीयं व्युत्सृजामि त्रिविधेन सावद्यम् ॥

मू. (३००) *अस्संजमवोसिरणं उवहिविवेगो तहा उवसमो अ ।*
*पडिरूवजोगविरिओ खंतो मुत्तो विवेगो य ॥*

छा. असंयमव्युत्सर्जनं उपधिविवेकश्च तथा उपशमश्च ।
प्रतिरूपयोगवीर्यवान् क्षान्तो मुक्तो विविक्तश्च ॥

मू. (३०१) *एयं पच्चक्खाणं आउरजण आवईसु भावेणं ।*
*अन्नतरं पडिवन्नो जंपंतो पावइ समाहिं ॥*

छा. एतत् प्रत्याख्यानं आतुरजनः आपत्सु भावेनान्य-
तरप्रतिपन्नः जल्पन् प्राप्नोति समाधिम् ॥

मू. (३०२) *मम मंगलमरिहंता सिद्धा साहू सुयं च धम्मो य ।*
*तेसिं सरणोवगओ सावज्जं वोसिरामित्ति ॥*

छा. मम मङ्गलमर्हन्तः सिद्धाः साधवः श्रुतं च धर्म्मश्च ।
तेषां शरणोपगतः सावद्यं व्युत्सृजामीति ॥

मू. (३०३) *सिद्धे उवसंपन्नो अरिहंते केवली य भावेण ।*
*इत्तो एगतरेणवि पएण आराहओ होइ ॥*

छा. सिद्धानुपसंपन्नः अर्हतः केवलिनश्च भावेन ।
एषामेकतरेणापि पदेनाराधको भवति ॥

मू. (३०४) *समुइन्नवेयणो पुण समणो हिययम्मि किं निवेसिज्जा ।*
*आलंबणं च काइं काऊण मुणी दुहं सहइ ॥*

छा. समुदीर्णवेदनः पुनः श्रमणो हृदये किं निवेशयेत् ।
आलंबनानि च कानि कृत्वा मुनिर्दुखं सहते ॥

मू. (३०५) *नरएसु अनुत्तरेसु अ अनुत्तरा वेयणाओ पत्ताओ ।*
*वट्टंतेण पमाए ताओवि अनंतसो पत्ता ॥*

छा. नरकेषु अनुत्तरेषु च अनुत्तरा वेदनाः प्राप्ताः ।
प्रमादे वर्त्तमानेन पुनस्ता अनंतशः प्राप्तव्याः ॥

मू. (३०६) *एयं सयं कयं मे रिणं व कम्मं पुरा आसायं तु ।*
*तमहं एस धुणामी मणम्मि सत्तं निवेसिज्जा ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. एतत् स्वयंकृतं मया ऋणमिव कर्म पुरा असातं तु।
तदहं एष धुनामि (एवं) मनसि सत्वं निवेशयेत्॥

मू. (३०७) *नानाविहदुक्खेहि य समुइन्नेहि उ सम्म सहणिज्जं।*
*न य जीवो उ अजीवो कयपुव्वो वेयणाईहिं॥*

छा. नानाविधेषु दुःखेषु समुदीर्णेषु सम्यक् सहनीयम्।
नैव जीवस्त्वजीवः कृतपूर्वो वेदनादिभिः॥

मू. (३०८) *अब्भुज्जयं विहारं इत्थं जिनदेसियं विउपसत्थं।*
*नाउं महापुरिससेवियं जं अब्भुज्जयं मरणं॥*

छा. अभ्युद्यतं विहारं एवं जिनदेशितं विद्वत्प्रशस्तम्।
ज्ञात्वा महापुरुषसेवितं यत् अभ्युद्यतं मरणं॥

मू. (३०९) *जह पच्छिमम्मि काले पच्छिमतित्थयरदेसियमुयारं।*
*पच्छानिच्छयपत्थं उवेइ अब्भुज्जयं मरणं॥*

छा. यथा पश्चिमे काले पश्चिमतीर्थकरदेशितमुपकारं पश्चात्
निश्चयपथ्यं उपेति अभ्युद्यतं मरणम्॥

मू. (३१०) *छत्तीसमट्टियाहि य कडजोगी (जोग) संगहबलेणं।*
*उज्जमिऊणं बारसविहेण तवनियमठाणेणं॥*

छा. षट्त्रिंशता आर्तजनकैः (उष्णपरीषहोसर्गै) कृतयोगी योगसंग्रहबलेन।
उद्यम्य द्वादशविधेन तपोनियमस्थानेन॥

मू. (३११) *संसाररंगमज्झे धिइबलसन्नद्धबद्धकच्छाओ।*
*हंतूण मोहमल्लं हराहि आराहणपडागं॥*

छा. संसाररंगमध्ये धृतिबलसन्नद्धबद्धकक्षाकः।
हत्वा मोहमल्लं हराराधनापताकाम्॥

मू. (३१२) *पोराणयं च कम्मं खवेइ अन्नन्नबंधणायाइं (यं)।*
*कम्मकलंकलवल्लिं छिंदइ संथारमारूढो॥*

छा. पुराणं च कर्म क्षपयति अन्यान्यबन्धनायातम्।
कर्मकल्मषवल्लीं छिनत्ति संस्तारकमारूढः॥

मू. (३१३) *धीरपुरिसेहिं कहियं सप्पुरिसनिसेवियं परमघोरं।*
*उत्तिण्णोमि हु रंगं हरामि आराहणपडागं॥*

छा. धीरपुरुषैः कथितं सत्पुरुषनिषेवितं परमघोरम्।
उत्तीर्णोऽस्मि रङ्गं हराम्याराधनापताकाम्॥

मू. (३१४) *धीर! पडागाहरणं करेहि जह तंसि देसकालम्मि।*
*सुत्तत्थमणुगुणिंतो धिइनिच्चलबद्धकच्छाओ॥*

छा. धीर! पताकहरणं कुरु (एवं) यथा तस्मिन् देशकाले।
सूत्रार्थमनुगुणयन् धृतिनिश्चलबद्धकक्षाकः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (३१५) *चत्तारि कसाए तिन्नि गारवे पंच इंदियग्गामे ।*
*जिणिउं परीसहसहे हराहि आराहणपडागं ॥*

छा. चतुरः कषायान् त्रीणि गौरवाणि पंचेन्द्रियग्रामान् ।
जित्वा परीषहानपि च हराराधनापताकाम् ॥

मू. (३१६) *न य मनसा चिंतिज्ञा जीवामि चिरं मरामि व लहुंति ।*
*जइ इच्छसि तरिउं जे संसारमहोअहिमपारं ॥*

छा. न च मनसा चिन्तयेत् जीवामि चिरं म्रिये वा लघु इति ।
यदीच्छसि तरीतुं संसारमहोदधिमपारम् ॥

मू. (३१७) *जइ इच्छसि नीसरिउं सव्वेसिं चेव पावकम्माणं ।*
*जिनवयणनाणदंसणचरित्तभावुज्जुओ जग्ग ॥*

छा. यदीच्छसि निस्तरीतुं सर्वेभ्यश्चैव पापकर्मभ्यः ।
जिनवचनज्ञानदर्शनचारित्रभावोद्यतो जागृहि ॥

मू. (३१८) *दंसणनाणचरित्ते तवे य आराहणा चउक्खंधा ।*
*सा चेव होइ तिविहा उक्कोसा मज्झिमजहन्ना ॥*

छा. दर्शने ज्ञाने चारित्रे तपसि चाराधना चतुःस्कन्धा ।
सैव भवति त्रिविधा उत्कृष्टा मध्यमा जघन्या ॥

मू. (३१९) *आराहेऊण विऊ उक्कोसाराहणं चउक्खंधं ।*
*कम्मरयविप्पमुक्को तेणेव भवेण सिज्झिज्ञा ॥*

छा. आराध्य विद्वान् उत्कृष्टामाराधनां चतुःस्कन्धाम् ।
कर्मरजोविप्रमुक्तस्तेनैव भवेन सिध्येत् ॥

मू. (३२०) *आराहेऊण विऊ मज्झिमआराहणं चउक्खंधं ।*
*उक्कोसेण य चउरो भवे उ गंतूण सिज्झिज्ञा ॥*

छा. आराध्य विद्वान् मध्यमाराधनां चतुःस्कन्धाम् ।
उत्कर्षेण च चतुरो भवांस्तु गत्वा सिध्येत् ॥

मू. (३२१) *आराहेऊण विऊ जहन्नमाराहणं चउक्खंधं ।*
*सत्तट्ठ भवग्गहणे परिणामेऊण सिज्झिज्ञा ॥*

छा. आराध्य विद्वान् जघन्यामाराधनां चतुःस्कन्धाम् ।
सप्ताष्टौ भवग्रहणानि परिणमय्य सिध्येत् ॥

मू. (३२२) *धीरेणवि मरियव्वं काउरिसेणवि अवस्स मरियव्वं ।*
*तम्हा अवस्समरणे वरं खु धीरत्तणे मरिउं ॥*

छा. धीरेणापि मर्त्तव्यं कापुरुषेणाप्यवश्यमर्त्तव्यं ।
तस्मादवश्यमरणे वरं खलु धीरत्वेन मर्त्तुम् ॥

मू. (३२३) *एयं पच्चक्खाणं अनुपालेऊण सुविहिओ सम्मं ।*
*वेमाणिओ व देवो हविज्ञ अहवावि सिज्झिज्ञा ॥*

छा. एतत् प्रत्याख्यानमनुपाल्य सुविहितः सम्यक् ।
वैमानिको वा देवो भवेत् अथवापि सिध्येत् ॥

मू. (३२४) *एसो सवियारकओ उवक्कमो उत्तमट्ठकालम्मि ।*
*इत्तो उ पुणो वुच्छं जो उ कमो होइ अवियारे ॥*

छा. एष सविचारकृत उपक्रम उत्तमार्थकाले ।
इतस्तु पुनर्वक्ष्ये यस्तु क्रमो भवत्यविचारः ॥

मू. (३२५) *साहू कयसंलेहो विजियपरीसहकसायसंताणो ।*
*निज्जवए मग्गिज्ञा सुयरयणस(२)हस्सनिम्माए ॥*

छा. साधुः कृतसंलेखनो विजितपरीषहकषायसंतानः ।
निर्यामकान् मार्गयेत् श्रुतरत्नरहस्यनिष्णातान् ॥

मू. (३२६) *पंचसमिए तिगुत्ते अणिस्सिए रागदोसमयरहिए ।*
*कडजोगी कालन्नू नाणचरणदंसणसमिद्धे ॥*

छा. पञ्चसमितांस्त्रिगुप्तान् अनिश्रितान् रागद्वेषमदरहितान् ।
कृतयोगिनः कालज्ञान् ज्ञान् चरणदर्शनसमृद्धान् ॥

मू. (३२७) *मरणसमाहीकुसले इंगियपत्थियसभाववेत्तारे ।*
*ववहारविहिविहिण्णू अब्भूज्जयमरणसारहिणो ॥*

छा. मरणसमाधिकुशलान् इङ्गितप्रार्थितस्वभाववेत्तन ।
व्यवहारविधिविधानज्ञान् अभ्युद्यतमरणसारथिनः ॥

मू. (३२८) *उवएसहेउकारणगुणनिसढा नायकारणविहण्णू ।*
*विन्नाणनाणकरणोवयारसुयधारणसमत्थे ॥*

छा. उपदेशहेतुकारणगुणक्षमान् न्यायकारणविधानज्ञान् ।
विज्ञानज्ञानकरणोपचारश्रुतधारणासमर्थान् ॥

मू. (३२९) *एगंतगुणे रहिया बुद्धीइ चउव्विहाइ उववेया ।*
*छंदण्णू पव्वइया पच्चक्खाणंमि य विहण्णू ॥*

छा. एकान्तेन गुणेषु स्थितान् बुद्धया चतुर्विधयोपपेतान् ।
छन्दोज्ञान् प्रव्रजितान् प्रत्याख्याने च विधिज्ञान् ॥

मू. (३३०) *दुण्हं आयरियाणं दो वेयावच्चकरणनिजुत्ता ।*
*पाणगवेयावच्चे तवस्सिणो वत्ति दो पत्ता ॥*

छा. द्वयोराचार्ययोर्द्वौ वैयावृत्यकरणनियुक्तौ ।
पानकवैयावृत्ये तपस्विनो वेति द्वौ प्राप्तौ ॥

मू. (३३१) *उव्वत्तण परिवत्तण उच्चारुस्सास(व)करणजोगेसुं ।*
*दो वायगत्ति णज्जा न(उ.प्र.)सुत्तकरणे जहन्नेणं ॥*

छा. (३३१) उद्वर्त्तनपरिवर्त्तनोच्चारोत्सावकरणयोगेषु ।
द्वौ वाचकौ इति ज्ञेयौ सूत्रकरणे जघन्येन ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (३३२) *असद्दहवेयणाए पायच्छित्ते पडिक्कमणए य।*
*जोगायकहाजोगे पच्चक्खाणे य आयरिओ ॥*

छा. अश्रद्दधाने वेदनायां प्रायश्चित्ते प्रतिक्रमणे च।
योगात्मकथायोगे प्रत्याख्याने च आचार्यः ॥

मू. (३३३) *कप्पाकप्पविहिन्नू दुवालसंगसुयसारही सव्वं।*
*छत्तीसगुणोवेया पच्छित्तवियारया धीरा ॥*

छा. कल्प्याकल्प्यविधिज्ञा द्वादशाङ्गश्रुतसारथिनः सर्वथा।
षटत्रिंशद्गुणोपपेताः प्रायश्चित्तविशारदा धीराः ॥

मू. (३३४) *एए ते निज्जवया परिकहिया अट्ठ उत्तमट्ठम्मि।*
*जेसिं गुणसंखाणं न समत्था पायया वुत्तुं ॥*

छा. एते तुभ्यं निर्यामकाः परिकथिता अष्ट उत्तमार्थे।
येषां गुणसंख्यानं न समर्था प्राकृता वक्तुम् ॥

मू. (३३५) *एरिसयाण सगासे सूरीणं पवयणप्पवाईणं।*
*पडिवज्जिज्ज महत्थं समणो अब्भुज्जयं मरणं ॥*

छा. एतादृशानां सकाशे सूरीणां प्रवचनप्रवादिनाम्।
प्रतिपद्येत महार्थं श्रमणोऽभ्युद्यतं मरणम् ॥

मू. (३३६) *आयरियउवज्झाए सीसे साहम्मिए कुलगणे य।*
*जे मे किया कसाया सव्वे तिविहेण खामेमि ॥*

छा. आचार्यान् उपाध्यायान् शिष्यान् साधर्मिकान् कुलगणौ च।
ये मया कृताः कषायिताः सर्वान् त्रिविधेन क्षमयामि ॥

मू. (३३७) *सव्वस्स समणसंघस्स भावओ अंजलिं करे सीसे।*
*सव्वं खमावइत्ता खमामि सव्वस्स अहयंपि ॥*

छा. सर्वस्मै श्रमणसंघाय भावतोऽञ्जलिं कृत्वा शीर्षे।
सर्वं क्षमयित्वा क्षम्यामि सर्वस्याहमपि ॥

मू. (३३८) *गरहित्ता अप्पाणं अनुणक्कारं पडिक्कमित्ताण।*
*नाणम्मि दंसणम्मि अ चरित्तजोगाइयारे य ॥*

छा. गर्हयित्वाऽऽत्मानं अपुनःकारं प्रतिक्रम्य।
ज्ञाने च दर्शने च चारित्रयोगातिचारे च ॥

मू. (३३९) *तो सीलगुणसमग्गो अणुवहयक्खो बलं च थामं च।*
*विहरिज्ज तवसमग्गो अनियाणो आगमसहाओ ॥*

छा. ततः शीलगुणसमग्रः अनुपहताक्षो बलं च स्थाम च।
विहरेत् तपःसमग्रोऽनिदान आगमसहायः ॥

मू. (३४०) *तवसोसियंगमंगो संधिसिराजालपागडसरीरो।*
*किच्छाहियपरिहत्थो परिहरइ कलेवरं जाहे ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. तपःशोषितांगोपांगः प्रकटसन्धिशिराजालशरीरः ।
कृच्छ्रहितनैपुण्यः परिहरति कलेवरं यदा ॥

मू. (३४१) *पच्चक्खाइ य ताहे अन्नन्नसमाहिपत्तियंमित्ती ।*
*तिविहेणाहारविहिं दियसुग्गइकायपगईए ॥*

छा. प्रत्याख्याति च तदा अन्याऽन्यसमाधिप्रत्ययमिति ।
त्रिविधेनाहारविधिं उदितसुगतिकायप्रकृतिकः ॥

मू. (३४२) *इहलोए परलोए निरासओ जीविए अ मरणे य ।*
*सायानुभवे भोगे जस्स य अवहट्टणाऽईए ॥*

छा. इहलोके परलोके च निराश्रयो जीविते च मरणे वा ।
सातानुभवे भोगे यस्य चापहरणा ऽतीते ॥

मू. (३४३) *निम्ममनिरहंकारो निरासयोऽकिंचणो अपडिकम्मो ।*
*वोसट्ठविसट्ठंगो चत्तचियत्तेण देहेणं ॥*

छा. निर्ममनिरहंकारो निराश्रयोऽकिञ्चनोऽप्रतिकर्मा ।
अत्यर्थं विसृष्टांगः त्यक्तप्रीतिना देहेन ॥

मू. (३४४) *तिविहेणवि सहमाणो परीसहे दूसहे अ ऊसग्गे ।*
*विहरिज्ज विसयतण्हारयमलमसुभं विहुणमाणो ॥*

छा. त्रिविधेनापि सहमानः परीषहान् दुःसहांश्च उत्सर्गवान् ।
विहरेत् विषयतृष्णारजोमलमशुभं विधूनयन् ॥

मू. (३४५) *नेहक्खए व दीवो जह खयमुवणेइ दीववट्टिम्मि (ट्टिंपि) ।*
*खीणाहारसिनेहो सरीरवट्टिं तह खवेइ ॥*

छा. स्नेहक्षये वा दीपो यथा क्षयमुपनयति दीपवर्त्तिमपि ।
क्षीणाहारस्नेहः शरीरवर्त्ति तथा क्षपयति ॥

मू. (३४६) *एव परज्झा असई परक्कमे पुव्वभणियसूरीणं ।*
*पासम्मि उत्तमट्ठे कुज्जा तो एस परिकम्मं ॥*

छा. एवं प्रारब्धः सति पराक्रमे पूर्वभणितसूरीणाम् ।
पार्श्वे उत्तमार्थाय कुर्यात्तदा एतत् परिकर्म ॥

मू. (३४७) *आगरसमुट्ठिंयं तह अज्झुसिरवागतणपत्तकडए य ।*
*कट्ठसिल्लाफलगंमि व अणभिज्जय निप्पकप्पंमि ॥*

छा. आकरसमुत्थिते तथा अशुषिरवल्कतृणपत्रकटके च ।
काष्ठशिलाफलके वा अभिद्यमाने निष्प्रकल्पे ॥

मू. (३४८) *निस्संधिणातणंमि व सुहपडिलेहेण जइपसत्थेणं ।*
*संथारो कायव्वो उत्तरपुव्वस्सिरो वावि ॥*

छा. निस्सन्धिकेन तृणेन वा सुखप्रतिलेखनेन यतिप्रशस्तेन ।
संस्तारः कर्त्तव्य उत्तरस्यां पूर्वस्यां शिरो वाऽपि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (३४९) *दोसुत्थ अप्पमाणे अंधकारे समम्मि अ निसिट्ठे ।*
*निरुवहयम्मि गुणमणे वणम्मि गुत्ते (थणंनि गुत्ते) य संथारो ।।*

छा. दोषोऽत्र अप्रमाणे अन्धकारे च (ततः) समे च निसृष्टे ।
निरुपहते गुणवतिवने गुप्ते च संस्तारकः ।।

मू. (३५०) *जुत्ते पमाणरइओ उभउकालपडिलेहणासुद्धो ।*
*विहिविहिओ संथारो आरुहियव्वो तिगुत्तेणं ।।*

छा. युक्ते प्रमाणरचित उभयकालप्रतिलेखनायुक्तः शुद्धः ।
विधिविहितः संस्तारकः आरूढव्यस्त्रिगुप्तेन ।।

मू. (३५१) *आरुहियचरित्तभरो अन्नेसु उ (अन्नसउ) परमगुरुसगासम्मि ।*
*दव्वेसु पज्जवेसु य खित्ते काले य सव्वंमि ।।*

छा. आरूढचारित्रभारः अन्येष्वपि परमगुरुसकाशे ।
द्रव्येषु पर्यायेषु च क्षेत्रे काले च सर्वस्मिन् (प्रशस्तेष्वारूढः) ।।

मू. (३५२) *एएसु चेव ठाणेसु चउसु सव्वो चउव्विहाहारो ।*
*तवसंजमुत्ति किच्चा वोसिरियव्वो तिगुत्तेणं ।।*

छा. एतेषु चैव स्थानेषु चतुर्षु सर्वश्चतुर्विध आहारः ।
तपःसंयम इतिकृत्वा व्युत्स्रष्टव्यस्त्रिगुप्तेन ।।

मू. (३५३) *अहवा समाहिहेउं कायव्वो पाणगस्स आहारो ।*
*तो पाणगंपि पच्छा वोसिरियव्वं जहाकाले ।।*

छा. अथवा समाधिहेतोः कर्त्तव्यः पानकस्याहारः ।
ततः पानकमपि पश्चात् व्युत्स्रष्टव्यं यथाकाले ।।

मू. (३५४) *निसिरित्ता अप्पाणं सव्वगुणसमन्नियम्मि निज्जवए ।*
*संथारगसंनिविट्ठो अनियाणो चेव विहरिज्जा ।।*

छा. निसृज्यात्मानं सर्वगुणसमन्वितेषु निर्यामकेषु
संस्तारकसंनिविष्टोऽनिदानकश्चैव विहरेत् ।।

मू. (३५५) *इहलोए परलोए अनियाणो जीविए य मरणे य ।*
*वासीचंदनकप्पो समो य माणावमाणेसु ।।*

छा. इहलोके परलोकेऽनिदानो जीविते च मरणे च ।
वासीचन्दनकल्पः समश्च मानापमानयोः ।।

मू. (३५६) *अह महुरं फुडवियडं तहप्पसायकरणिज्जविसयकयं ।*
*इज्ज कहं निज्जवओ सुईसमन्नाहरणहेउं ।।*

छा. अथ मधुरां स्फुटविकटां तथात्मसात्कृतकरणीयविषयाम् ।
निर्यामकःकथां कथयेत् श्रु(स्मृ)तिसमन्वाहरणहेतोः ।।

मू. (३५७) *इहलोए परलोए नाणचरणदंसणंमि य अवायं ।*
*दंसेइ नियाणम्मि य मायामिच्छत्तसल्लेणं ।।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. इहलोके परलोके ज्ञाने चरणे दर्शने च (कर्मणः)
अपायं दर्शयति निदाने च मायामिथ्यात्वशल्ययोश्च ॥

मू. (३५८) *बालमरणे अवायं तह य उवायं अबालमरणम्मि ।*
*उस्सासरज्जुवेहाणसे य तह गिद्धपट्ठे य ॥*

छा. बालमरणेऽपायं तथा चोपायमबालमरणे ।
उच्छ्वास(रोध)रज्जुवैहायसेषु च तथा गृध्रपृष्ठे च ॥

मू. (३५९) *जह य अनुद्धुयसल्लो ससल्लमरणेण कइ मरऊणं ।*
*दंसणनाणविहूणो मरंतिअसमाहिमरणेणं ॥*

छा. यथा चानुध्धृ तशल्यः सशल्यमरणेन केचिन्मृत्वा ।
दर्शनज्ञानविहीना म्रियंतेऽसमाधिमरणेन ॥

मू. (३६०) *जह सायरसे गिद्धा इत्थिअहंकारपावसुयमत्ता ।*
*ओसन्नबालमरणा भमंति संसारकंतारं ॥*

छा. यथा सातरसयोर्गृद्धाः रुहयहङ्कारपापश्रुतमत्ताः ।
बाहुल्येन बालमरणा भ्राम्यन्ति संसारकान्तारे ॥

मू. (३६१) *अह मिच्छत्त ससल्ला मायासल्लेण जह ससल्ला य ।*
*जह य नियाण ससल्ला मरंति असमाहिमरणेणं ॥*

छा. अथ मिथ्यात्वेन सशल्या मायाशल्येन यथा सशल्याश्च ।
यथा च निदानेन सशल्या म्रियन्तेऽसमाधिमरणेन ॥

मू. (३६२) *जह वेयणावसट्टा मरंति जह केइ इंदियवसट्टा ।*
*जह य कसायवसट्टा मरंति असमाहिमरणेणं ॥*

छा. यथा वेदनावशार्त्ता म्रियन्ते यथा केचिदिन्द्रियवशार्त्ताः ।
यथा च कषायवशार्त्ता म्रियन्तेऽसमाधिमरणेन ॥

मू. (३६३) *जह सिद्धिमग्ग दुग्गइसग्गग्गलमोडणाणि मरणाणि ।*
*मरिऊण केइ सिद्धिं उविंति सुसमाहिमरणेणं ॥*

छा. यथा सिद्धिमार्गे दुर्गतिस्वर्गार्गलामोटनानि मरणानि ।
मृत्वा केचित्सुसमाधिमरणेन सिद्धिमुपयान्ति ॥

मू. (३६४) *एवं बहुप्पयारं तु अवायं उत्तमट्ठकालम्मि ।*
*दंसंति अवायण्णू सल्लुद्धरणे सुविहियाणं ॥*

छा. एवं बहुप्रकारं त्वपायमुत्तमार्थकाले
दर्शयन्त्यपायज्ञाः शल्योद्धरणाय सुविहितानाम् ॥

मू. (३६५) *दिंति य सिं उवएसं गुरुणो नाणाविहेहिं हेऊहिं ।*
*जेण सुगइं भयंतो संसारभयद्दुओ होइ ॥*

छा. ददति चैषामुपदेशं गुरवो नानाविधैर्हेतुभि ।
येन सुगतिं भजन् संसारभयद्रुतो भवति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (३६६) *न हु तेसु वेयणं खलु अहो चिरम्मित्ति दारुणं दुक्खं ।*
*सहणिज्जं देहेणं मणसा एवं विचिंतिज्जा ॥*

छा. नैव तेषु वेदना खलु अहो ! चिरमिति दारुणं दुःखम् ।
सहनीयं देहेन मनसैवं च विचिन्तयेत् ॥

मू. (३६७) *सागरतरणत्थमई इयस्स पोयस्स जए धूवे ।*
*जो रज्जु मुक्खकालो न सो विलंबत्ति कायव्वो ॥*

छा. सागरतरणार्थमतिकः आयातस्य पोतस्य ध्रुवे जये ।
यो रज्जुमोक्षकालः स कर्त्तव्यः, न विलम्ब इति कर्त्तव्यः ॥

मू. (३६८) *तिल्लविहूणो दीवो न चिरं दिप्पइ जगम्मि पच्चक्खं ।*
*न य जलरहिओ मच्छो जिअइ चिरं नेव पउमाई ॥*

छा. तैलविहीनो दीपो न चिरं दीप्यते जगति प्रत्यक्षम् ।
न च जलरहितो मत्स्यो जीवति चिरं नैव च पद्मादि (जलं विना) ॥

मू. (३६९) *अन्नं इमं सरीरं अन्नोऽहं इय मणम्मि ठाविज्जा ।*
*जं सुचिरेणऽवि मोच्चं देहे को तत्थ पडिबंधो ॥*

छा. अन्यदिदं शरीरं अन्योऽहमिति मनसि स्थापयेत् ।
यत्सुचिरेणापि मोच्यं तत्र देहे कः प्रतिबन्धः ॥

मू. (३७०) *दूरत्थंपि विणासं अवस्सभावं उवट्ठियं जाण ।*
*जो अह वट्टइ कालो अणागओ इत्थ आसिण्हा ॥*

छा. दूरस्थमपि विनाशमवश्यभाविनमुपस्थितं जानीहि ।
यो यथा वर्त्तते कालोऽनागतोऽत्र चासीनस्य ॥

मू. (३७१) *जं सुचिरेणवि होहिइ अणावसं तंमि को ममीकारो ।*
*देहे निस्संदेहे पिएवि सुयणत्तणं नत्थि ॥*

छा. यत्सुचिरेणापि भविष्यति अवशं(शरीरं)तस्मिन् को ममीकारः ।
देहे निसंदेहं प्रियेऽपि सुजनत्वं नास्ति ॥

मू. (३७२) *उवलद्धो सिद्धिपहो न य अनुचिण्णो पमायदोसेणं ।*
*हा जीव ! अप्पवेरिय ! न हु ते एयं न तिप्पिहिइ ॥*

छा. उपलब्धः सिद्धिपथो न चानुचीर्ण प्रमाददोषेण ।
हा जीव ! आत्मवैरिन् ! नैव तवैतत्, न च तर्पयिष्यति ॥

मू. (३७३) *नत्थि य ते संघयणं घोरा य परीसहा अहे निरया ।*
*संसारो य असारो अइप्पमाओ अ तं जीव ! ॥*

छा. नास्ति च तव संहननं घोराश्च परीषहा अधो नरकाः ।
संसारश्चासारः अतिप्रमादश्च त्वं जीव ! ॥

मू. (३७४) *कोहाइकसाया खलु बीयं संसारभेरवदुहाणं ।*
*तेसु पमत्तेसु सया कत्तो सुक्खो य मुक्खो वा ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. क्रोधादयः कषायाः खलु बीजं संसारभैरवदुःखानाम् ।
तैः प्रमत्तेषु सदा कुतः सौख्यं च मोक्षश्च ॥

मू. (३७५) *जाओ परव्वसेणं संसारे वेयणाओ घोराओ ।*
*पत्ताओ नारगत्ते अहुणा ताओ विचिंतिज्ञा ॥*

छा. याः पारवश्येन संसारे वेदना घोराः ।
प्राप्ता नारकत्वेऽधुना ता विचिन्तय ॥

मू. (३७६) *इण्हिं सयं वसिस्स उ निरुवमसुक्खावसाणमुहदूयं ।*
*कल्लाणमोसहं पिब परिणामसुहं न तं दुक्खं ॥*

छा. इदानीं स्ववशस्य तु निरुपमसौख्यावसानुमुखकटुकम् ।
कल्याणौषधं पिब परिणामसुखं न तद्दुखम् ॥

मू. (३७७) *संबंधि बंधवेसु य न य अनुराओ खणंपि कायव्वो ।*
*तेच्चिय हुंति अमित्ता जह जणणी बंभदत्तस्स ॥*

छा. सम्बन्धिबान्धवेषु च न चानुरागः क्षणमपि कर्त्तव्यः ।
ते चैव भवन्त्यमित्राणि यथा जननी ब्रह्मदत्तस्य ॥

मू. (३७८) *वसिऊण व सुहिमज्झे वच्चइ एगाणिओ इमो जीवो ।*
*मोत्तूण सरीरघरं जह कण्हो मरणकालम्मि ॥*

छा. उषित्वा च सुहृन्मध्ये व्रजत्येकाक्ययं जीवः ।
मुक्त्वा स्वशरीरगृहं यथा कृष्णो मरणकाले ॥

मू. (३७९) *इण्हिं व मुहुत्तेणं गोसे व सुए व अद्धरत्ते वा ।*
*जस्स न नज्जइ वेला कद्दिवसं गच्छिई जीवो ॥*

छा. अधुना वा मुहूर्तेन प्रभाते वा श्वो वाऽर्द्धरात्रे वा ।
यस्य न ज्ञायते वेला क्व दिवसे गमिष्यति जीवः ॥

मू. (३८०) *एवमनुचिंतयंतो भावनुभावानुरत्त सियलेसो ।*
*तद्दिवस मरिउकामो व होइ झाणम्मि उज्जुत्तो ॥*

छा. एवमनुचिन्तयन् भावानुभावानुरक्तः सितलेश्यः ।
तस्मिन् दिने मर्त्तु कामो वा (ऽपि) भवति ध्याने उद्युक्तः ॥

मू. (३८१) *नरगतिरिक्खगईसु य माणुसदे वत्तणे वसंतेणं ।*
*जं सुहदुक्खं पत्तं तं अनुचिंतिज्ज संथारे ॥*

छा. नरके तिर्यग्गतिषु च मानुषदेवत्वयोर्वसता
यत्सुखदुःखं प्राप्तं तदनु चिन्तयेत् संस्तारके ॥

मू. (३८२) *नरएसु वेयणाओ अनोवमा सीयउणहवेरा(गा)ओ ।*
*कायनिमित्तं पत्ता अनंतखुत्तो बहुविहओ ॥*

छा. नरकेषु वेदना अनुपमाः शीतोष्णवैर जाताः ।
कायनिमित्तं प्राप्ता अनन्तकृत्वो बहुविधाः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (३८३) *देवत्ते माणुस्से पराहिओगत्तणं उवगएणं।*
*दुक्खपरिक्केसविही अनंतखुत्तो समनुभूया॥*

छा. देवत्वे मानुष्ये पराभियोगत्वमुपगतेन।
दुःखपरिक्लेशविधयोऽनन्तकृत्वः समनुभूताः॥

मू. (३८४) *भिन्निंदियपंचिंदियतिरिक्खकायम्मि नेगसंठाणे।*
*जम्मणमरणऽरहट्टं अनंतखुत्तो गओ जीवो॥*

छा. भिन्नेन्द्रियपञ्चेन्द्रियतिर्यककायेऽनेकसंस्थाने।
जन्ममरणारहट्टमनन्तकृत्वो गतो जीवः॥

मू. (३८५) *सुविहिय! अईयकाले अनंतकाएसु तेण जीवेणं।*
*जम्मणमरणमनंतं बहुभवगहणं समणुभूयं॥*

छा. सुविहित! अतीतकालेऽनन्तकायेषु एतेन जीवेन।
जन्ममरणमनन्तं बहुभवग्रहणे समनुभूतम्॥

मू. (३८६) *घोरम्मि गब्भवासे कलमलजंबालअसुइबीभच्छे।*
*वसिओ अनंतखुत्तो जीवो कम्मानुभावेणं॥*

छा. घोरे गर्भवासे कलिमलजम्बालाशुचिबीभत्से।
उषितोऽनन्तकृत्वो जीवः कर्मानुभावेन॥

मू. (३८७) *जोणीमुह निग्गच्छंतेण संसार इमे(रिमे)ण जीवेणं।*
*रसियं अइबीभच्छं कडीकडाहंतरगएणं॥*

छा. योनिमुखान्निर्गच्छता संसारेऽनेन जीवेन।
रसितमतिबीभत्सं कटिकटाहान्तरगतेन॥

मू. (३८८) *जं असियं बीभच्छं असुईघोरम्मि गब्भवासम्मि।*
*तं चिंतिऊण सयं मुक्खम्मि मइं निवेसिज्जा॥*

छा. यदशितं बीभत्सं अशुचिघोरे गर्भवासे।
तच्चिन्त यित्वा स्वयं मोक्षे मतिं निवेशयेत्॥

मू. (३८९) *वसिऊण विमानेसु य जीवो पसरंतमणिमऊहेसु।*
*वसिओ पुणोवि सुच्चिय जोणिसहस्संधयारेसुं॥*

छा. उषित्वा विमानेषु च जीवः प्रसरनमणिमयूखेषु।
उषितः पुनरपि स एव योनिसहस्रन्धकारेषु॥

मू. (३९०) *वसिऊण देवलोए निच्चुज्जोए सयंपभे जीवो।*
*वसइ जलवेगकलमलविउलवलयामुहे घोरे॥*

छा. उषित्वा देवलोके नित्योद्योते स्वयंप्रभे जीवः।
वसति विपुलजलवेगकलिमलवलयामुखे घोरे॥

मू. (३९१) *वसिऊण सुरनरीसरचामीयररिद्धिमणहरघरेसु।*
*वसिओ नरग निरंतरभयभेरवपंजरे जीवो॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. उषित्वा सुरनरेश्वरचामीकरऋद्धिमन्मनोहरगृहेषु ।
उषितो नरके निरन्तरभयभैरवपञ्जरे जीवः ॥

मू. (३९२) *वसिऊण विचित्तेसु अ विमाणगणभवण सोभसिहरेसु ।*
*वसइ तिरिएसु गिरिगुहविवरमहाकंदरदरीसु ॥*

छा. उषित्वा विचित्रेषु च विमानगणभवनेषु शोभितशिखरेषु ।
वसति तिर्यक्षु गिरिगुहाविवरमहाकन्दरदरीषु ॥

मू. (३९३) *भुत्तूणवि भोगसुहं सुरनरखयरेसु पुण पमाएणं ।*
*पियइ नरएसु भेरवकलंततउतंबपाणाइं ॥*

छा. भुक्त्वाऽपि भोगसुखं सुरनरखचरेषु पुनः प्रमादेन ।
पिबति नरकेषु भैरवकलकलायमानत्रपुताम्रपानानि ॥

मू. (३९४) *सोऊण मुइयणरवइभवे अ जयसद्दमंगलरवोघं ।*
*सुणइ नरएसु दुहपरं अक्कंदुद्दामसद्दाइं ॥*

छा. श्रुत्वा मुदितनरपतिभवे च जयशब्दमङ्गलरवौघम् ।
श्रृणोति नरकेषु दुःखकरान् आक्रन्दोद्दामशब्दान् ॥

मू. (३९५) *निहण हण गिण्ह दह पय उब्बंध पबंध बंध रुद्धाहिं ।*
*फाले लोले घोले थूरे खारेहिं से गत्तं ॥*

छा. निजहि जहि गृहाण दह पच उद्बन्धय प्रबन्धय बधान
रुंद्धि स्फाटय लोलय घोलय स्थूरय क्षारैस्तस्य गात्रं ॥

मू. (३९६) *वेयरणिखारकलिमलवेसल्लंकुसलकरकयकुलेसु ।*
*वसिओ नरएसु जीवो हणहणघणघोरसद्देसुं ॥*

छा. वैतरणिक्षारकलिमलविविधशल्यकुशल(०अंकुश)क्रकचाकुलेषु ।
उषितो नरकेषु जीवो हनहनघनघोरशब्देषु ॥

मू. (३९७) *तिरिएसु व भेरवसद्दपक्खणपरपक्खणच्छणसएसु ।*
*वसिओ उव्वियमाणो जीवो कुडिलम्मि संसारे ॥*

छा. तिर्यक्षु च भैरवशब्दपक्षणपरिपक्षणतक्षणशतेषु ।
उषित उद्विजन् जीवः कुटिले संसारे ॥

मू. (३९८) *मणुयत्तणेवि बहुविहविणिवायसहस्सभेसणघणम्मि ।*
*भोगपिवासाणुगओ वसिओ भयपंजरे जीवो ॥*

छा. मनुजत्वेऽपि बहुविधविनिपातसहस्रघनभीषणे ।
भोगपिपासानुगत उषितो भयपञ्जरे जीवः ॥

मू. (३९९) *वसियं दरीसु वसियं गिरीसु वसियं समुद्दमज्झेसु ।*
*रुक्खग्गेसु य वसियं संसारे संसरंतेणं ॥*

छा. उषितं दरीषु उषितं दरीषु उषितं गरिषु उषितं समुद्रमध्येषु ।
वृक्षाग्रेषु चोषितं संसारे संसारता ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (४००) *पीयं थणअच्छीरं सागरसलिलाओ बहुयरं हुज्ञा।*
*संसारम्मि अनंते माईणं अन्नमन्नाणं ॥*

छा. पीतं स्तनक्षीरं सागरसलिलाद्बहुतरं भवेत्।
संसारेऽनन्ते मातॄणामन्यान्यासाम् ॥

मू. (४०१) *नयणोदगंपि तासिं सागरसलिलाओ बहुयरं हुज्ञा।*
*गलियं रुयमाणीणं माईणं अण्णमण्णाणं ॥*

छा. नयनोदकमपि तासां सागरसलिलाद्बहुतरं भवेत्।
गलितं रुदन्तीनां मातॄणामन्यान्यासाम् ॥

मू. (४०२) *नत्थि भयं मरणसमं जम्मणसरिसं न विज्ञए दुक्खं।*
*तम्हा जरमरण करं छिंद ममत्तं सरीराओ ॥*

छा. नास्ति भयं मरणसमं जन्मसदृशं न विद्यते दुःखम्।
तस्माज्जरामरणकरं छिन्द्धि ममत्वं शरीरात् ॥

मू. (४०३) *अन्नं इमं सरीरं अन्नो जीवुत्ति निच्छियमईओ।*
*दुक्खपरीकेसकरं छिंद ममत्तं सरीराओ ॥*

छा. अन्यदिदं शरीरं अन्यो जीव इति निश्चितमतिकः।
दुःखपरिक्लेशकरं छिन्द्धि ममत्वं शरीरात् ॥

मू. (४०४) *जावइयं किंचि दुहं सारीरं माणसं च संसारे।*
*पत्तो अनंतखुत्तो कायस्स ममत्तदोसेणं ॥*

छा. यावत्किञ्चिद्दुखं शारीरं मानसं च संसारे।
प्राप्तोऽनन्तकृत्वः कायस्य ममत्वदोषेण ॥

मू. (४०५) *तम्हा सरीरमाई अब्भिंतर बाहिरं निरवसेसं।*
*छिंद ममत्तं सुविहिय ! जइ इच्छसि मुच्चिउ दुहाणं ॥*

छा. तस्मात् शरीरादि अभ्यन्तरं बाह्यं निरवशेषं (आश्रित्य)।
छिन्द्धि ममत्वं सुविहित ! यदीच्छसि दुःखेभ्यो मोक्तुम् ॥

मू. (४०६) *सव्वे उवसग्ग परीसहे य तिविहेण निज्ञिणाहि लहु।*
*एएसु निज्ञिएसुं होहिसि आराहओ मरणे ॥*

छा. सर्वानुपसर्गान् परीषहांश्च निर्जय त्रिविधेन लघु।
एतेषु निर्जितेषु भविष्यस्याराधको मरणे ॥

मू. (४०७) *मा हु य सरीरसंताविओ अ तं झाहि अट्टरुद्दाइं।*
*सुट्ठुवि रूवियतिंगेवि अट्टरुद्दाणि रूवंति ॥*

छा. मा च शरीरसंतापितश्च त्वमार्त्तरौद्रे ध्याय।
सुष्ठ्वपि निरूपिलिङ्गन् आर्त्तरौद्रे रोदयतः ॥

मू. (४०८) *मित्तसुयबंधवाइसु इट्ठानिट्ठेसु इंदियत्थेसुं।*
*रागो वा दोसो वा ईसि मणेणं न कायव्वो ॥*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. मित्रसुतबान्धवादिषु इष्टानिष्टेष्विन्द्रियार्थेषु ।
रागो वा द्वेषो वा ईषदपि मनसा न कर्त्तव्यः ।।

मू. (४०९) *रोगायंकेसु पुणो बिउलासु य वेयणासुइन्नासु ।*
*सम्मं अहियासंतो इणमो हियणए चिंतिज्जा ।।*

छा. रोगातङ्केषु पुनर्विपुलासु च वेदनासूदीर्णासु ।
सम्यगध्यसयन् इदं हृदयेन चिन्तयेत् ।।

मू. (४१०) *बहुपलियसागराइं सङ्घाणि मे नरयतिरियजाईसुं ।*
*किं पुण सुहावसाणं इणमो सारं नरदुहंति ।।*

छा. बहुपल्योपमसागरोपमाणि यावत् दुःखानि मया नरकतिर्यगजातिषु
सोढानि किं पुनः सुखावसानमिदं सारं नरदुःखमिति ।।

मू. (४११) *सोलस रोगायंका सहिया जह चक्किणा चउत्थेणं ।*
*वाससहस्सा सत्त उ सामण्णधरं उवगएणं ।।*

छा. षोडश रोगातङ्काः षोढा यथा चक्रिणा चतुर्थेन ।
वर्षसहस्राणि सप्त तु श्रामण्यधरत्वमुपगतेन ।।

मू. (४१२) *तह उत्तमट्ठकाले देहे निरवक्खयं उवगएणं ।*
*तिलच्छित्तलावगा इव आयंका विसहियव्वाओ ।।*

छा. तथोत्तमार्थकाले देहे निरपेक्षतामुपगतेन ।
तिलक्षेत्रलावका इव आतङ्का विसोढव्याः ।।

मू. (४१३) *पारियव्वायगभत्तो राया पट्ठीइ सेट्ठिणो मूढो ।*
*अच्चुण्हं परमन्नं दासी य सुकोवियमणुस्सा ।।*

छा. परिव्राडभक्तो राजा पृष्ठौ श्रेष्ठिनो मूढः ।
अत्युष्णं परमान्नमदात् सुकोपितमनुष्यात् ।।

मू. (४१४) *सा य सलिलुल्ललोहियमंसवसापेसिथिग्गलं धित्तुं ।*
*उप्पइया पट्ठीओ पाई जह रक्खसवहुव्व ।।*

छा. सा च पात्री सलिलार्द्ररुधिरमांसवसापेशीथिग्गलं
गृहीत्वा पृष्ठेरुत्पतिता यथा राक्षसवधूः ।।

मू. (४१५) *तेण य निव्वेएणं निग्गंतूणं तु सुविहियसगासे ।*
*आरुहियचरित्तभो सीहोरसियं समारूढो ।।*

छा. तेन च निर्वेदेन निर्गत्य तु सुविहितसकाशे ।
आरूढचारित्रभरः सिंहोरस्यं समारूढः ।।

मू. (४१६) *तम्मि य महिहरसिहरे सिलायले निम्मले महाभागो ।*
*वोसिरइ थिरपइन्नो सव्वाहारं महतणू य ।।*

छा. तस्मिंश्च महीधरशिखरे शिलातले निर्मले महाभागः ।
व्युत्सृजति स्थिरप्रतिज्ञः सर्वाहारं महातनुं च ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (४१७) *तिविहोवसग्ग सहिउं पडिमं सो अद्धमासियं धीरो ।*
*ठाइ य पुव्वाभिमुहो उत्तमधिइसत्तसंजुत्तो ॥*

छा. त्रिविधोपसर्गान् सहित्वा प्रतिमां सोऽर्द्धमासिकीं धीरः ।
तिष्ठति च पूर्वाभिमुख उत्तमधृतिसत्वसंयुक्तः ॥

मू. (४१८) *सा य पगतंतलोहियमेयवसामंसलपरी(लंधरा) पट्ठी ।*
*खज्जइ खगेहिं दूसहनिसट्ठचंचुप्पहारेहिं ॥*

छा. सा च प्रगलद्रुधिरमेदवशामांसव्याप्ता पृष्ठिः ।
खाद्यते खगैः निसृष्टदुःसहचञ्चुप्रहारैः ॥

मू. (४१९) *मसएहिं मच्छियाहि य कीडीहिवि मंससंपलगाहिं ।*
*खज्जंतोवि न कंपइ कम्मविवागं गणेमाणो ॥*

छा. मशकैर्मक्षिकाभिश्च कीटिकाभिरपि मांससंप्रलग्नाभिः ।
खाद्यमानोऽपि न कम्पते कर्मविपाकं गणयन् ॥

मू. (४२०) *रत्तिं च पयइविहसियसियालियाहिं निरनुकंपाहिं ।*
*उवसग्गिज्जइ धीरो नानाविहरूवधाराहिं ॥*

छा. रात्रौ च प्रकृतिविहसितश्च गालिकाभिर्निरनुकम्पाभिः ।
उपसर्ग्यते धीरो नानाविधरूपधारिणीभिः ॥

मू. (४२१) *चिंतेइ य करवयअसिपंजरखग्गमुग्गरपहाओ ।*
*इणणो न हु कट्ठयरं दुक्खं निरयग्गिदुक्खाओ ॥*

छा. चिन्तयति च खरक्रकचासिपञ्जरखड्गमुद्गरप्रहारात् ।
इदं नैव कष्टकरं दुःखं नरकाग्निदुःखाच्च ॥

मू. (४२२) *एवं च गओ पक्खो बीओ पक्खो य दाहिणदिसाए ।*
*अवरेणवि पक्खोवि य समइक्कंतो महेसिस्स ॥*

छा. एवं च गतः पक्षो द्वितीयः पक्षश्च दक्षिणस्यां दिशि ।
अपरस्यामपि पक्षोऽपि च समतिक्रान्तो महर्षे ॥

मू. (४२३) *तह उत्तरेण पक्खं भगवं अविकंपमाणसो सहइ ।*
*पडिओ य दुमासंते नमोत्ति वोत्तुं जिणिंदाणं ॥*

छा. तथोत्तरस्यां पक्षं भगवान् अविकम्पमानसः सहते ।
पतितश्च द्विमास्यन्ते जिनेन्द्रेभ्यो नमोऽस्त्वित्युक्त्वा ॥

मू. (४२४) *कंचणपुरम्मि सिट्ठी जिनधम्मो नाम सावओ आसी ।*
*तस्स इमं चरियपयं तउ एयं कित्तिम मुनिस्स ॥*

छा. काञ्चनपुरे श्रेष्ठी जिनधर्मो नाम श्रावक आसीत् ।
तस्यैतच्चरितपदं ततु एतत्कृत्रिममुनेः ॥

मू. (४२५) *जह तेण वितथमुणिणा उवसग्गा परमदूसहा सहिया ।*
*तह उवसग्गा सुविहिय ! सहियव्वा उत्तमट्ठंमि ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. यथा तेन वितथमुनिना उपसर्गा परमदुष्कराः सोढाः ।
तथोपसर्गा सुविहित ! सोढव्या उत्तमार्थे ।।

मू. (४२६) *निष्फेडियाणि दुन्निवि सीसावेढेण जस्स अच्छीणि ।*
*न य संजमाउ चलिओ मेअज्ञो मंदरगिरिव्व ।।*

छा. निष्काशिते द्वे अपि शिरसावेष्टेन यस्याक्षिणी ।
न च संयमाच्चलितो मेतार्यो मन्दरगिरिरिव ।।

मू. (४२७) *जो कुंचगावराहे पाणिदया कुंचगंपि नाइक्खे ।*
*जीवियमणुपेहंतं मेयज्ञरिसिं नमंसामि ।।*

छा. यः क्रौञ्चकापराधे प्राणिदयायाः क्रौञ्चकमपि नाख्यत् ।
तं समयजीवितमनुप्रेक्षमाणं मेतार्यर्षि नमस्यामि ।।

मू. (४२८) *जो तिहिं पएहिं धम्मं समइगओ संजमं समारूढो ।*
*उवसमविवेगसंवर चिलाइपुत्तं नमंसामि ।।*

छा. यस्त्रिभिः पदैर्धर्मं समधिगतः संयमं च समारूढः ।
उपशमविवेकसंवरैस्तं चिलातीपुत्रं नमस्यामि ।।

मू. (४२९) *सोएहिं अइगयाओ लोहियगंधेण जस्स कीडीओ ।*
*खायंति उत्तमंगं तं दुक्करकारयं वंदे ।।*

छा. श्रोतोभिरभिगता रुधिरगन्धेन यस्य कीटिकाः ।
खादन्त्युत्तमाङ्गं तं दुष्करकारकं वन्दे ।।

मू. (४३०) *देहो पिपीलियाहिं चिलाइपुत्तस्स चालणिव्व कओ ।*
*तनुओवि मनपओसो न य जाओ तस्स तानुवरिं ।।*

छा. देहः पिपीलिकाभिश्चिलातीपुत्रस्य चालनीव कुतः ।
तुनकोऽपि मनःप्रद्वेषो न च जातस्तस्य तासामुपरि ।।

मू. (४३१) *धीरो चिलाइपुत्तो मूइंगलियाहिं चालिणिव्व कओ ।*
*न य धम्माओ चलिओ तं दुक्करकारयं वंदे ।।*

छा. धीरश्चिलातीपुत्रः पिपीलिकाभिश्चालनीव कृतः ।
न च धर्माच्चलितस्तं दुष्करकारकं वन्दे ।।

मू. (४३२) *गयसुकुमालमहेसी जह दङ्को पिइवणंसि ससुरेणं ।*
*न य धम्माओ चलिओ तं दुक्करकारयं वंदे ।।*

छा. गजसुकुमालमहर्षिर्यथा दग्धः पितृवने श्वशुरेण ।
न च धर्माच्चलितस्तं दुष्करकारकं वन्दे ।।

मू. (४३३) *जह तेन सो हुयासो सम्मं अइरेगदूसहो सहिओ ।*
*तह सहियव्वो सुविहिय ! उवसग्गो देहदुक्खं य ।।*

छा. यथा तेन स हुताशनः सम्यगतिरेकदुःसहः सोढः ।
तथा सोढव्यः सुविहित ! उपसर्गो देहदुःखं च ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (४३४) *कमलामेलाहरणे सागरचंदो सुईहिं नभसेणं ।*
*आगंतूण सुरत्ता संपइ संपाइणो वारे ॥*

छा. कमलामेलोदाहरणे सागरचन्द्रः सचिभि (मृतः)नभः सेनम् ।
आगत्य सुरत्वात् तत्कालं संपातिनो वारयति ॥

मू. (४३५) *जा तस्स खमा तइया जो भावो जा य दुक्करा पडिमा ।*
*तं अणगार ! गुणागर तुमंपि हियएण चिंतेहि ॥*

छा. या तस्य क्षमा तदा यो भावो य च दुष्करा प्रतिमा ।
तद् अनगार ! गुणाकर ! त्वमपि हृदयेन चिन्तय ॥

मू. (४३६) *सोऊण निसासमए नलिनिविमाणस्स वण्णणं धीरो ।*
*संभरियदेवलोओ उज्जेणि अवंतिसुकुमालो ॥*

छा. श्रुत्वा निशासमये नलिनीगुल्मविमानस्य वर्णनं धीरः ।
संस्मृतदेवलोक उज्जयिन्यामवन्तीसुकुमालः ॥

मू. (४३७) *धित्तूण समणदिक्खं नियमुज्झियसव्वदिव्वआहारो ।*
*बाहिं वंसकुडंगे पायवगमणं निवण्णो उ ॥*

छा. गृहीत्वा श्रमणदीक्षां नियमोज्झित सर्वदिव्य आहारः ।
बहिर्वंशकुडङ्गे पादपोपगमनेनोपविष्टः ॥

मू. (४३८) *वोसट्ठनिसट्ठंगो तहिं सो भुलुंकियाइ खइओ उ ।*
*मंदरगिरिनिक्कंपं तं दुक्करकारयं वंदे ॥*

छा. निसहव्युत्सृष्टाङ्गस्तत्र सः श्रृ गाल्या खादितस्तु ।
मन्दरगिरिनिष्कम्पं तं दुष्करकारकं वन्दे ॥

मू. (४३९) *मरणंमि जस्स मुक्कं सुकुसुमगंधोदयं च देवेहिं ।*
*अज्जवि गंधवई सा तं च कुडंगीसरट्ठाणं ॥*

छा. मरणे यस्य मुक्तं सुकुसुमगन्धोदकं च देवैः ।
अद्यापि गन्धवती सा (भूमि) तच्च कुडङ्गेश्वरस्थानम् ॥

मू. (४४०) *जह तेन तत्थ मुणिणा सम्मं सुमणेण इंगिणी तिन्ना ।*
*तह तूरह उत्तमट्ठं तं च मने सन्निवेसेह ॥*

छा. यथा तेन तत्र मुनिना सम्यक् सुमनसा इङ्गिनी तीर्णा ।
तथा त्वरस्व उत्तमार्थे तच्च मनसि संनिवेशय ॥

मू. (४४१) *जो निच्छएण गिण्हइ देहच्चाएवि न अट्ठियं कुणइ ।*
*सो साहेइ सकज्जं जह चंदवडिंसओ राया ॥*

छा. यो निश्चयेन गृह्णाति देहत्यागेऽपि नास्थितिं करोति ।
स साधयति स्वकार्यं यथा चन्द्रावतंसको राजा ॥

मू. (४४२) *दीवाभिग्गहधारी दूसहघणविणयनिच्चलनगिंदो ।*
*जह सो तिन्नपइण्णो तह तूरह तुमं पइन्नंमि ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. दीपाभिग्रहधारी दुःसह(पाप)धनविनयननिश्चलनगेन्द्रः ।
यथा स तीर्णप्रतिज्ञस्तथा त्वरस्व त्वं प्रतिज्ञायाम् ॥

मू. (४४३) *जह दमदंतमहेसी पंडयकोरव मुनी थुयगरहिओ ।*
*आसि समो दुण्हंपि हु एव समा होह सव्वत्थ ॥*

छा. यथा दमदन्तमहर्षि कौरवपाण्डवाभ्यां गर्हितस्तुतो मुनि ।
आसीद्द्वयोरपि समः एवं समो भव सर्वत्र ॥

मू. (४४४) *जह खंदगसीसेहिं सुक्कमहाझाणसंसियमेहिं ।*
*न कओ मनप्पओसो पीलिज्जंतेसु जंतंमि ॥*

छा. यथा स्कन्दकशिष्यैः शुक्लमहाध्यानसंसृतमनस्कैः ।
न कृतो मनःप्रद्वेषो यन्त्रेण पीड्यमानैः ॥

मू. (४४५) *तह धन्नसालिभद्दा अनगारा दोवि तवमहिड्डीया ।*
*वेभारगिरिसमीवे नालंदाए समीवंमि ॥*

छा. तथा धन्यशालिभद्रौ अनगारौ द्वावपि तपोमहर्द्धिकौ ।
वैभारगिरिसमीपे नालन्दायाः समीपे ॥

मू. (४४६) *जुअलसिलासंथारे पायवगमणं उवगया जुगवं ।*
*मासं अनूनगं ते वोसट्ठनिसट्ठसव्वंगा ॥*

छा. शिलायुगलसंस्तारके युगपत्पादपोपगमनमुपगतौ ।
मासमनूनं तौ निसहव्युत्सृष्टसर्वाङ्गौ ॥

मू. (४४७) *सीयायवझडियंगा लग्गुद्धियमंसण्हारुणि विणट्ठा ।*
*दोवि अनुत्तरवासी महेसिण रिद्धिसंपण्णा ॥*

छा. शीतातपक्षपिताङ्गौ लग्नोद्ध त(भग्नास्थि)मांसस्नायुकौ विनष्टौ
द्वावपि अनुत्तरवासिनौ महर्षी ऋद्धिसंपन्नौ जातौ ॥

मू. (४४८) *अच्छेरयं च लोए ताण तहिं देवयानुभावेणं ।*
*अज्जवि अट्ठिनिवेसं पंकिव्व सनामगा हत्थी ॥*

छा. आश्चर्यं च लोके तयोस्तत्र देवताऽनुभावेन ।
अद्यापि पङ्के इवास्थिनिवेशं स्वनामकौ हस्तिनौ (विद्येते) ॥

मू. (४४९) *जह ते समंसचम्मे दुबलविलग्गेवि नो सयं चलिया ।*
*तह अहियासेयव्वं गमणे थेवंपिमं दुक्खं ॥*

छा. यथा तौ समांसचर्मणि दुर्बलविलग्नेऽपि देहे न स्वयं चलितौ
तथाऽध्यासितव्यं गमने स्तोकमपीदं दुःखम् ॥

मू. (४५०) *अयलग्गाम कुडुंबिय सुरइयसयदेवसमणयसुभद्दा ।*
*सव्वे उ गया खमगं गिरिगुहनिलयम्मियच्छीय ॥*

छा. अचलग्रामे कौटुम्बिकाः सुरतिकशतकद्देवश्रमणकसुभद्राः ।
सर्वेऽपि गताः क्षपणकं गिरिगुहानिलयेऽद्राक्षिषुः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (४५१) *ते तं तवोकिलंतं वीसामेऊण विनयपुव्वागं ।*
*उवलद्धपुण्णपावा फासुयसुमहं करेसीह ॥*

छा. ते तं तपःक्लाम्यन्तं विश्रम्य विनयपूर्वम् ।
उपलब्धपुण्यपापाः प्रासुकं सुमहिमानमकार्षुरिह ॥

मू. (४५२) *सुगहियसावयधम्मा जिनमहिमाणेसु जणियसोहग्गा ।*
*जसहरमुणिणो पासे निक्खंता तिव्वसंवेगा ॥*

छा. सुगृहीश्रावकधर्मा जिनमहिमसु जनितसौभाग्याः ।
यशोधरमुनेः पार्श्वे निष्क्रान्तास्तीव्रसंवेगाः ॥

मू. (४५३) *सुगिहियजिनवयणामयपरिपुट्ठा सीलसुरहिगंधड्ढा(ड्ढा) ।*
*विहरिय गुरुस्सगासे जिनवरवसुपुज्जतित्थंमि ॥*

छा. सुगृहीतजिनवचनामृतपरिपुष्टाः शीलसुरभिगन्धाढयाः ।
विहृताः गुरुसकाशे जिनवरवासुपूज्यतीर्थे ॥

मू. (४५४) *कणगावलिमुत्तावलिरयणावलिसीहकीलियकलंता ।*
*काही य ससंवेगा आयंबिलवड्ढमाणं च ॥*

छा. कनकावलीमुक्तावलीरत्नावलीसिंहनिष्क्रीडितानि कलयन्तः ।
अकार्षुश्च ससंवेगा आचाम्लवर्द्धमानं च ॥

मू. (४५५) *आसरिया य मनोहरसिहरंतरसंचरंतपुक्खरयं ।*
*आइकरचलणपंकयसिरसेवियमाल हिमवंतं ॥*

छा. आश्रिताश्च मनोहरशिखरान्तरसञ्चरत्पुष्करकम् ।
आदिकरचरणपङ्कजसेवितशिरोमालं हिमवन्तम् ॥

मू. (४५६) *रमणिज्जहरयतरुवरपरहुअसिहिभमरमहुयरिविलोले ।*
*अमरगिरिविसयमणहरजिनवयणसुकाननुद्देसे ॥*

छा. रमणीयद्रहतरुवरपरभृतशिखिभ्रमरमधुकरीविलोले ।
अमरगिरिविशदमनोहरजिनवच(भव)नसुकाननोद्देशे ॥

मू. (४५७) *तंमि सिलायल पुहवी पंचवि देहट्ठिईसु मुणियत्था ।*
*कालगया उववण्णा पंचवि अपराजियविमाणे ॥*

छा. तस्मिन् शिलातले पञ्चापि पार्थिवदेहस्थितिषु ज्ञातार्थाः ।
कालगताः पञ्चाप्युत्पन्ना अपराजितविमाने ॥

मू. (४५८) *ताओ चइऊण इहं भारहवासे असेसरिउदमणा ।*
*पंडुनराहिवतणया जाया जयलच्छिभत्तारा ॥*

छा. तस्माच्च्युत्वाइह भरतक्षेत्रेऽशेषरिपुदमनाः ।
पाण्डुनराधिपतनुजा जाता जयलक्ष्मीभर्त्तारः ॥

मू. (४५९) *ते कण्हभरणदूसहदुक्खसमुप्पन्नतिव्वसंवेगा ।*
*सुट्ठियथेरसगासे निक्खंता खायकित्तीया ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. ते कृष्णमरणदुःसहदुःखसमुत्पन्नतीव्रसंवेगाः ।
सुस्थितस्थविरसकाशे निष्क्रान्ताः ख्यातकीर्त्तिकाः ॥

मू. (४६०) *जिट्ठो चउदसपुव्वी चउरो इक्कारसंगवी आसी ।*
*विहरिय गुरुस्सगासे जसपडहभरंजियलोया ॥*

छा. ज्येष्ठश्चतुर्दशपूर्वी चतस्र एकादशाङ्गविद आसन् ।
व्याहूर्षु गुरुसकाशे यशःपटहभ्रियमाणजीवलोकाः ॥

मू. (४६१) *ते विहरिऊण विहिणा नवरि सुरट्ठं कमेण संपत्ता ।*
*सोउं जिननिव्वाणं भत्तपरिन्नं करेसीय ॥*

छा. ते विहृत्य विधिना नवरं सौराष्ट्रं क्रमेण संप्राप्ताः ।
श्रुत्वा जिननिर्वाणं भक्तपरिज्ञामकार्षुश्च ॥

मू. (४६२) *घोराभिग्गहधारी भीमो कुंतग्गगहियभिक्खाओ ।*
*सत्तुजयसेलसिहरे पाओवगओ गयभवोघो ॥*

छा. घोराभिग्रहधारी भीमः कुन्ताग्रगृहीतभिक्षाकः ।
शत्रुञ्जयशैलशिखरे पादपोपगतो गतभवौघः ॥

मू. (४६३) *पुव्वविराहियवंतरउवसग्गसहस्समारुयनगिंदो ।*
*अविकंपो आसि मुणी भाईणं इक्कपासम्मि ॥*

छा. पूर्वविराद्धव्यन्तरोपसर्गसहस्रमारुतनगेन्द्रः ।
अविकम्प आसीन्मुनिर्भ्रातॄणामेकपार्श्वे ॥

मू. (४६४) *दो मासे संपुण्णे सम्मं धिइधणियबद्धकच्छाओ ।*
*ताव उवसग्गिओ सो जाव उ परिनिव्वुओ भगवं ॥*

छा. द्वौ मासौ संपूर्णौ सम्यग्धृतिबाढबद्धकक्षाकः ।
तावदुपसर्गितः स यावत्तु परिनिर्वृतो भगवान् ॥

मू. (४६५) *सेसावि पंडुपुत्ता पाओवगया उ निव्वुया सव्वे ।*
*एवं धिइसंपन्ना अन्नेवि दुहाओ मुच्चंति ॥*

छा. शेषा अपि पाण्डुपुत्राः पादपोपगतास्तु निर्वृताः सर्वे ।
एवं धृतिसंपन्ना अन्येऽपि दुःखान्मुच्यन्ते ॥

मू. (४६६) *दंडोवि य अनगारो आयावणभूमिसंठिओ वीरो ।*
*सहिऊण बाणघायं सम्मं परिनिव्वुओ भगवं ॥*

छा. दण्डोऽपि चानगारः आतापनभूमिसंस्थितो वीरः ।
सोढ्वा बाणघातं सम्यक् परिनिर्वृतो भगवान् ॥

मू. (४६७) *सेलम्मि चित्तकूडे सुकोसलो सुट्ठिओ उ पडिमाए ।*
*नियजननीए खइओ वग्घीभावं उवगयाए ॥*

छा. शैले चित्रकूटे सुकोशलः सुस्थितस्तु प्रतिमया ।
निजजनन्या खादितो व्याघ्रीभामुपगतया ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (४६८) *पडि मायगओ अ मुनी लंबेसु ठिओ बहूसु ठाणेसुं ।*
*तहवि य अकलुसभावो सा हु खमा सव्वसाहूणं ।।*

छा. प्रतिमागतश्च मुनिर्दूरदूरेषु स्थितो बहुषु स्थानेषु ।
तथाऽपि चाकलुषभावः सैव क्षमा सर्वसाधूनाम् ।।

मू. (४६९) *पंचसयापरिवुडया वइररिसी पव्वए रहावत्ते ।*
*मुत्तूण खुड्डगं किर अन्नं गिरिमस्सिओ सुजसो ।।*

छा. पञ्चशतपरिवृतो वज्रर्षि पर्वते रथावर्त्ते ।
मुक्त्वा क्षुल्लकं किल अन्यं गिरिमाश्रितः सुयशाः ।।

मू. (४७०) *तत्थ य सो उवलतले एगागी धीरनिच्छयमईओ ।*
*वोसिरिऊण सरीरं उण्हम्मि ठिओ वियप्पाणो ।।*

छा. तत्र च स उपलतले एकाकी धीरनिश्चयमतिकः ।
व्युत्सृज्य शरीरमुष्णे स्थितो विदात्मा ।।

मू. (४७१) *ता सो अइसुकुमालो दिनयरकिरणग्गितावियसरीरो ।*
*हविपिंडुव्व विलीणो उववन्नो देवलोयम्मि ।।*

छा. ततः सोऽतिसुकुमालो दिनकरकिरणाग्नितापितशरीरः ।
हविपिण्ड इव विलीन उत्पन्नो देवलोके ।।

मू. (४७२) *तस्स य सरीरपूयं कासीय रहेहि लोगपाला उ ।*
*तेन रहावत्तगिरी अज्जवि सो विस्सुओ लोए ।।*

छा. तस्य च शरीरपूजामकार्षू रथैर्लोकपालाः ।
तेन रथावर्त्तगिरिरद्यापि स विश्रुतो लोके ।।

मू. (४७३) *भगवंपि वइरसामी बिइयगिरिदेवयाइ कयपूओ ।*
*संपूइओऽत्थ मरणे कुंजरभरिएण सक्केणं ।।*

छा. भगवानपि वज्रस्वामि द्वितीयगिरिदेवतया कृतपूजः ।
संपूजितोऽत्र मरणे कुञ्जरसहितेन (रथेन) शक्रेण ।।

मू. (४७४) *पूइयसुविहियदेहो पयाहिणं कुंजरेण तं सेलं ।*
*कासीय सुरवरिंदो तम्हा सो कुंजरावत्तो ।।*

छा. पूजितसुविहितदेहः प्रदक्षिणां कुञ्जरेण तस्य शैलस्य ।
अकार्षीत्सुरवरेन्द्रस्तस्मात्स कुञ्जरावर्त्तः।।

मू. (४७५) *तत्तो य जोगसंगहउवहाणक्खाणयम्मि कोसंबी ।*
*रोहगमवंतिसेणो रुज्झेइ मणिप्पभो भासो ।।*

छा. ततश्च योगसङ्ग्रहे उपधानाख्यान कोशाम्बीम् ।
रोधेनावन्तीसेनो रुणद्धि मणिप्रभोऽभ्यासम् (आगतः) ।।

मू. (४७६) *धम्मगसुसीलजुयलं धम्मजसे तत्थ रण्णदेसम्मि ।*
*भत्तं पच्चक्खाइय सेलम्मि उ वच्छगातीरे ।।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. धर्माचार्यसुशीयुगलं धर्मयशास्तत्रारण्डदेशे ।
भक्तं प्रत्याख्याय शैले तु वत्सकातीरे (स्थितः) ॥

मू. (४७७) *निम्ममनिरहंकारो एगागी सेलकंदरसिलाए ।*
*कासीय उत्तमट्ठं सो भावो सव्वसाहूणं ॥*

छा. निर्ममनिरहङ्कार एकाकी शैलकन्दराशिलायाम् ।
अकार्षीदुत्तमार्थं स भावः सर्वसाधूनाम् ॥

मू. (४७८) *उण्हम्मि सिलावट्टे जह तं अरहण्णएण सुकुमालं ।*
*विग्घारियं सरीरं अनुचिंतिज्ञा तमुच्छाहं ॥*

छा. उष्णो शिलापट्टे यथाऽर्हन्नकेन सुकुमालं तत् ।
द्रावितं शरीरं तमुत्साहमनुचिन्तयेत् ॥

मू. (४७९) *गुब्बर पाओवगओ सुबुद्धिणा निग्घिणेण चाणक्को ।*
*दड्ढो न य संचलिओ सा हु धिई चिंतणिज्ञा उ ॥*

छा. करीषे पादपोपगतः सुबुद्धिना निर्घृणेन चाणक्यः ।
दग्धो न च संचलितः सैव धृतिश्चिन्तनीया ॥

मू. (४८०) *जह सोऽवि सप्पएसी वोसट्ठनिसिट्ठचत्तदेहो उ ।*
*वंसीपत्तेहिं विनिग्गएहिं आगासमुक्खित्तो ॥*

छा. यथा सोऽपि सप्रदेशी व्युत्सृष्टनिसृष्टक्तदेहस्तु ।
वंशीपत्रैर्विनिर्गतैराकाश उत्क्षप्तः ॥

मू. (४८१) *जह सा बत्तीसघडा वोसट्ठनिसट्ठचत्तदेहागा ।*
*धीरा वाएण उ दीवएण विगलिम्मि ओलइया ॥*

छा. यथा सा द्वात्रिंशद्धटा व्युत्सृष्टनिसृष्टत्यक्तदेहा ।
धीरा सवातेन प्रदीपनकेन विकाले विलीना ॥

मू. (४८२) *जंतेण करकएण व सत्थेहिं व सावएहिं विविहेहिं ।*
*देहे विद्धस्संते ईसिंपि अकप्पणारु(झ)मणा ॥*

छा. यन्त्रेण क्रकचेन वा शस्त्रैर्वा श्वापदैर्विविधैः ।
देहे विध्वस्यमाने ईषदपि असत्कल्पनाक्षपणा (अनारूढासन्मनःकल्पना) ॥

मू. (४८३) *पडिनीययाइ केसिं चम्मंसे खीलएहिं निहणित्ता ।*
*महुघयमक्खियदेहं पिवीलियाणं तु दिज्ञाहिं ॥*

छा. (केचित्) प्रत्यनीकतया केषाञ्चिच्चर्मांशे कीलकान्निहत्य ।
मधुघृतम्रक्षितदेहं पिपीलिकाभ्यो दद्यात् (अदुः) ॥

मू. (४८४) *जेण विरागो जायइ तं तं सव्वायरेण करणिज्ञं ।*
*सुव्वइ हु ससंवेगो इत्थ इलापुत्तदिट्ठंतो ॥*

छा. येन विरागो जायते तत्तत्सर्वादरेण करणीयम् ।
श्रूयते ससंवेगोऽत्रेलापुत्रो दृष्टान्तः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (४८५) *समुइण्णेसु य सुविहिय ! घोरेसु परीसहेसु सहणेणं ।*
*सो अत्थो सरणिज्जो जोऽधीओ उत्तरज्झयणे ॥*

छा. समुदीर्णेषु च सुविहित ! घोरेषु परीषहेषु सहनाय .
सोऽर्थ स्मरणीयो योऽधीत उत्तराध्ययनेषु ॥

मू. (४८६) *उज्जेणि हत्थिमित्तो सत्थसमग्गो वणम्मि कट्ठेणं ।*
*पायहरोसंवरण चिल्लगभिक्खा वन सुरेसुं ॥*

छा. उज्ञयिन्यां हस्तिमित्रः सार्थसमग्रो वने काष्ठे(कण्टके)न
हतपादः प्रत्याख्यानं क्षुल्लकभिक्षा वने सुरेण ॥

मू. (४८७) *तत्थेव य धनमित्तो चेल्लगमरणं नईइ तण्हाए ।*
*निच्छिण्णेसऽनज्जंत विंटियविस्सारणं कासि ॥*

छा. तत्रैव च घनमित्रः क्षुल्लकमरणं नद्यां तृष्णया
निस्तीर्णेष्व ज्ञानमानं विण्टिकाविस्मरणमकार्षीत् ॥

मू. (४८८) *मुनिचंदेण विदिन्नस्स रायगिहि परीसहो महाघोरो ।*
*जत्तो हरिवंसविहूसणस्स वुच्छ जिणिंदस्स ॥*

छा. राजगृहे(मन्दिरे) (तत्र) महाघोरः परीषहो मुनिचन्द्रेण विदत्तः ।
हरिवंशविभूषणस्य जिनेन्द्रस्य यत्र वसनं ॥

मू. (४८९) *रायगिहनिग्गया खलु पडिमापडिवन्नगा मुनी चउरो ।*
*सीयविहूय कमेणं पहरे पहरे गया सिद्धिं ॥*

छा. राजगृहनिर्गताः प्रतिमाप्रतिपन्ना मुनयश्चत्वारः ।
शीतविधूताः क्रमेण प्रहरे २ सिद्धिं गताः ॥

मू. (४९०) *उसिणे तगरऽरहन्नग चंपा मसएसु सुमणभद्दरिसी ।*
*खमसमण अज्जरक्खिय अचेल्लय यत्ते अ उज्जेणी ॥*

छा. उष्णे तगरायामर्हन्नकश्चम्पायां मशकेषु सुमनोभद्र ऋषिः ।
क्षमाश्रमणा आर्यरक्षिता अचेलकत्वे उज्जयिन्याम् ॥

मू. (४९१) *अरईय जाइसूकरो (मूओ) भव्वो अ दुलहबोहीओ ।*
*कोसंबीए कहिओ इत्थीए थूलभद्दरिसी ॥*

छा. अरतौ च जातिसूकरो मूको भव्यश्च दुर्लभो बोधिः ।
कौशाम्ब्यां कथितः स्त्रियां स्थूलभद्र ऋषिः ॥

मू. (४९२) *कुल्लइरम्मि य दत्तो चरियाइ परीसहे समक्खाओ ।*
*सिट्ठिसुयतिगिच्छणणं अंगुलदीवो य वासम्मि ॥*

छा. कुल्लकिरे च दत्तश्चर्यायाः परीषहे समाख्यातः ।
श्रेष्ठिसुतचिकित्सनमङ्गुलदीपश्च वर्षणे ॥

मू. (४९३) *गयपुर कुरुदत्तसुओ निसीहिया अडविदेस पडिमाए ।*
*गाविकुविएण दड्ढो गयसुकुमालो जहा भगवं ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. गजपुरे करुदत्तसुतो नैषेधिक्यामटवीदेशे प्रतिमया।
गोहेरकेण दग्धो गजसुकुमालो यथा भगवान् ॥

मू. (४९४) *तो(दो) अनगारा धिज्ञाइयाइ कोसंबि सोमदत्ताई।*
*पाओवगयाणदिणेसिज्ञाए सागरे छूढा ॥*

छा. द्वौ अनगारौ धिग्जातीयौ कौशाम्ब्यां सोमदत्तादी।
पादपोपगतौ नदीनैषेधिक्यां सागरे क्षिप्तौ ॥

मू. (४९५) *महुराइ महुरखमओ अक्कोसपरीसहे उ सविसेसो।*
*बीओ रायगिहम्मि उ अज्जुणमालारदिट्ठंतो ॥*

छा. मथुरायां मथुरः क्षपक आक्रोशपरीषहे तु सविशेषः।
द्वितीयो राजगृहेऽर्जुनमालाकारीदृष्टान्तः ॥

मू. (४९६) *कुंभारकडे नगरे खंदगसीसाण जंतपीलणया।*
*एवंविहे कहिज्जइ जह सहियं तस्स सीसेहिं ॥*

छा. कुम्भकारकटे नगरे स्कन्धकशिष्याणां यन्त्रपीलना।
एवंविधे कथ्यते यथा सोढं तस्य शिष्यैः ॥

मू. (४९७) *तह झाणनाणवु(जु)त्तं गीए संठि(पट्ठि)यस्स समुयाणं।*
*तत्तो अलाभगंमि उ जह कोहं निज्जिणे कण्हो ॥*

छा. तथा ध्यानज्ञानयुक्तस्य गीतार्थस्य समुदाने संप्रस्थितस्य।
ततोऽलाभे तु यथा क्रोधं निरजैषीत्कृष्णः ॥

मू. (४९८) *किसिपारासरढंढो बीयं तु अलाभगे उदाहरणं।*
*कण्हबलभद्दमन्नं चइऊण खमन्निओ सिद्धो ॥*

छा. कृषिपारासरढण्ढो द्वितीयमलाभके उदाहरणम्।
कृष्णबलभद्रकमन्यत् त्यक्त्वा क्षमान्वितः सिद्धः ॥

मू. (४९९) *महुरा जियसत्तुसुओ अणगारो कालवेसिओ रोगे।*
*मोग्गल्लसेलसिहरे खइओ किल सरसियालेणं ॥*

छा. मथुरायां जितशत्रुसुतोऽनगारः कालवैशिको रोगे।
मौद्गल्यशैलशिखरे खादितः किल शरशृगालेन ॥

मू. (५००) *सावत्थी जियसत्तूतणओ निक्खमण पडिम तणफासे।*
*वीरिय पविय विकंचण कुसलेसणकड्ढणासहणं ॥*

छा. श्रावस्त्यां जितशत्रुतनयो निष्क्रमणं प्रतिमा तृणस्पर्शे।
प्रापिते वीर्ये विकिञ्चनं कुशश्लैषणं कर्षणं सहनम् ॥

मू. (५०१) *चंपासु नंदगं चिय साहुदुगुंछाइ जल्लखउरंगे।*
*कोसंबि जम्मनिक्खमण वेयणं साहुपडिमाए ॥*

छा. चम्पायां नन्दकः साधुजुगुप्सायां जल्लप्रचुराङ्गे कौशाम्ब्यां
जन्म निष्क्रमणं वेदनं साधुप्रतिमायाम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (५०२) *महुराइ इंददत्तो सक्कारा पायछेयणे सड्ढो ।*
*पन्नाइ अज्जकालग सागरखमणो य दिट्ठंतो ॥*

छा. मथुरायामिन्द्रदत्तः असत्कारः पादपीलने श्राद्धः ।
प्रज्ञायामार्यकालकः सागरक्षमाश्रमणश्च दृष्टान्तः ॥

मू. (५०३) *नाणे असगडताओ खंभगनिधी अनहियासणे भद्दो ।*
*दंसणपरीसहम्मि उ आसाढभूई उ आयरिया ॥*

छा. ज्ञानेऽशकटातातः स्तम्भनिधिरन्ध्यासने स्थूलभद्रः ।
दर्शनपरीषहे तु आषाढभूतय आचार्या ॥

मू. (५०४) *चरियाए मरणम्मि उ समुइण्णपरीसहो मुनी एवं ।*
*भाविज्ज निउणजिणमयउवएससुईइ अप्पाणं ॥*

छा. चर्यायां मरणे तु समुदीर्णपरीषहो मुनि एवं ।
भावयेत् निपुण जिनमतोपदेशश्रुत्याऽऽत्मानम् ॥

मू. (५०५) *उम्मग्गसंपयायं मणहत्थं विसयसुमरियमणंतं ।*
*नाणंकुसेण धीरो धरेइ दित्तंपिव गइंदं ॥*

छा. उन्मार्गसंप्रयातं मनोहस्तिनं स्मृतविषयमनन्तं ।
ज्ञानाङ्कुशेन धीरो धारयति दृप्तमिव गजेन्द्रम् ॥

मू. (५०६) *एए उ अहासूरा महिड्ढिए को व भाणिउं सत्तो ।*
*किं वातिमूवमाए जिनगणधरथेरचरिएसुं ॥*

छा. एतांस्तु यथाशूरान् महर्द्धिकान् को वा भणितुं शक्तः ।
किं वाऽत्युपमया जिनगणधरस्थविरचरितेषु ॥

मू. (५०७) *किं चित्तं जइ नाणी सम्मद्दिट्ठी करंति उच्छाहं ।*
*तिरिएहिवि दुरनुचरो केहिवि अनुपालिओ धम्मो ॥*

छा. किं चित्रं यदि ज्ञानिनः सम्यग्दृष्ट्यः कुर्वन्ति (धर्मे) उत्साहं ।
तिर्यग्भिरपि दुरनुचरः कैश्चिदनुपालितो धर्मः ॥

मू. (५०८) *अरुणसिहं दट्ठूणं मच्छो सण्णी महासमुद्दम्मि ।*
*हा न गहिउत्ति काले झसत्ति संवेगमावण्णो ॥*

छा. अरुणशिखं दृष्ट्वा मत्स्यः संज्ञी महासमुद्रे हा !
न गृहीत इति काले झटिति संवेगमापन्नः ॥

मू. (५०९) *अप्पाणं निंदंतो उत्तरिऊणं महन्नवजलाओ ।*
*सावज्जजोगविरओ भत्तपरिण्णं करेसीय ॥*

छा. आत्मानं निन्दयन् उत्तीर्य महार्णवजलात् ।
सावद्ययोगविरतो भक्तपरिज्ञामकार्षीत् ॥

मू. (५१०) *खगतुंडभिन्नदेहो दूसहसूरग्गितावियसरीरो ।*
*कालं काऊण सुरो उववन्नो एव सहणिज्जं ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. खगतुण्डभिन्नदेहो दुस्सहसूर्याग्नितापितशरीरः ।
कालं कृत्वा सुर उत्पन्न एवं सहनीयम् ॥

मू. (५११) *सो वानरजूहवई कंतारे सुविहयानुकंपाए ।*
*भासुरवरबुंदिधरो देवो वेमाणिओ जाओ ॥*

छा. स वानरयूथपति कान्तारे सुविहितानुकम्पया ।
भासुरवरबोन्दिधरो देवो वैमानिको जातः ॥

मू. (५१२) *तं सीहसेनगयवरचरियं सोऊण दुक्करं रन्ने ।*
*को हु णु तवे पमायं करेज्ञ जाओ मणुस्सेसुं ॥*

छा. तत् सिंहसेनगजवरचरितं श्रुत्वा दुष्करमरण्ये ।
को नु तपसि प्रमादं कुर्यात् जातो मनुष्येषु ॥

मू. (५१३) *भुयगपुरोहियडक्को राया मरिऊण सल्लइवणम्मि ।*
*सुपसत्थगंधहत्थी बहुभयगयभेलणो जाओ ॥*

छा. भुजगपुरोहितदष्टो राजा मृत्वा सल्लकीवने ।
सुप्रशस्तो गन्धहस्ती बहुभयगजभेषणो जातः ॥

मू. (५१४) *सो सीहचंदमुनिवरपडिमापडिबोहिओ सुसंवेगो ।*
*पाणवहालियचोरियअब्बंभपरिग्गह नियत्तो ॥*

छा. स सिंहचन्द्रमुनिवरप्रतिमाप्रतिबोधितः सुसंवेगः ।
प्राणवधालीकचौर्याब्रह्मपरिग्रहेभ्यो निवृत्तः ॥

मू. (५१५) *रागद्दोसनियत्तो छट्ठक्खमणस्स पारणे ताहे ।*
*आससिऊणं पंडं आयवतत्तं जलं पासी ॥*

छा. रागद्वेषनिवृत्तः षष्ठक्षपणस्य पारणे तदा ।
आश्वास्यात्मानमातपतप्तं जलमपात् ॥

मू. (५१६) *खमगत्तणनिम्मंसो धवनिसिरोजालसंतयसरीरो ।*
*विहरिय अप्पप्पाणो मुनिउवएसं विचिंतंतो ॥*

छा. क्षपकत्वेन निर्मांसः धमनिशिराजालसंततशरीरः ।
व्यहार्षीदल्पप्राणो मुन्युपदेशं विचिन्तयन् ॥

मू. (५१७) *सो अन्नया निदाहे पंकोसन्नो वणं निरुत्थारो ।*
*चिरवेरिएण दिट्ठो कुक्कुडसप्पेण घोरेणं ॥*

छा. सोऽन्यदा निदाधे पङ्कावसन्नो वने निरुत्साहः ।
चिरवैरिकेण दष्टः कुर्कुटसर्पेण घोरेण ॥

मू. (५१८) *जिनवयणमनुगुणिंतो ताहे सव्वं चउव्विहाहारं ।*
*वोसिरिऊण गइंदो भावेण जिणे नमंसीय ॥*

छा. जिनवचनमनुगुणयन् तदा सर्वं चतुर्विधाहारं ।
व्युत्सृज्य गजेन्द्रो भावेन जिनाननंसीत् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (५१९) *तत्थ य वणयरसुरवरविम्हियकीरंतपूयसक्कारो ।*
*मज्झत्थो आसी किर कलहेसु य जज्जरिज्जंतो ।।*

छा. तत्र च विस्मितव्यन्तरसुरवरक्रियमाणपूजासत्कारः ।
मध्यस्थ आसीत् किलकलमैश्च जर्जरीक्रियमाणः ।।

मू. (५२०) *सम्मं सहिऊण तओ कालगओ सत्तमंमि कप्पम्मि ।*
*सिरितिलयम्मि विमाणे उक्कोसठिई सुरो जाओ ।।*

छा. सम्यक् सोढ्वा ततः कालगतः सप्तमे कल्पे ।
श्रीतिलके विमाने उत्कृष्टस्थिति सुरो जातः ।।

मू. (५२१) *सुयदिट्ठिवायकहियं एयं अक्खाणयं निसामित्ता ।*
*पंडियमरणम्मि मइं दढं निवेसिज्ज भावेणं ।।*

छा. दृष्टिवादश्रुतकथितमेतदाख्यानकं निशम्य
पण्डितमरणे दृढां मतिं भावेन निवेशयेत् ।।

मू. (५२२) *जिणवयणमनुसट्ठा दोवि भुयंगा महाविसा घोरा ।*
*कासीय कोसियासय तनूसु भत्तं मुइंगाणं ।।*

छा. अनुसृष्टजिनवचनौ द्वावपि भुजङ्गौ महाविषौ घोरौ ।
अकार्ष्टां कौशिकाश्रमे तनुभ्यां विपीलिकानां भक्तम् ।।

मू. (५२३) *एगो विमाणवासी जाओ वरविज्जु पंजरसरीरो ।*
*बीओ उ नंदनकुले बलुत्ति जक्खो महड्डिओ ।।*

छा. एको विमानवासी जातो वरविद्युत्पिञ्जरशरीरः ।
द्वितीयस्तु नन्दनकुले बल इति यक्षो महर्द्धिकः ।।

मू. (५२४) *हिमचूलसुरुप्पत्ती भद्दगमहिसी य थूलभद्दो य ।*
*वेरोसवसमे कहणा सुरभावे दंसणे खमणो ।।*

छा. हिमचूलसुरोत्पत्तिर्भद्रकमहिषी च स्थूलभद्रश्च ।
वैरोपशमाय कथनं सुरभावे दर्शने क्षमायुक् ।।

मू. (५२५) *बावीसमानुपुव्विं तिरिक्खमणुयावि भेसणट्ठाए ।*
*विसयानुकंपरक्खण करेज्ज देवा उ उवसग्गं ।।*

छा. द्वाविंशतिमानुपूर्व्या (चिन्तय) तिर्यङ्मनुष्या
अपि भापनार्थं विषयानुकम्पापत्यरक्षणार्थं कुर्युर्देवास्तूपसर्गम् ।।

मू. (५२६) *संघयणधिईजुत्तो नवदसपुव्वी सुएण अंगा वा ।*
*इंगिणि पाओवगमं पडिवज्जइ एरिसो साहू ।।*

छा. संहननधृतियुक्तो नवदशपूर्वी श्रुतेनाङ्गेन वा ।
इङ्गिनीं पादपोपगमनं प्रतिपद्यते ईदृशः साधुः ।।

मू. (५२७) *निच्चल निप्पडिकम्मो निक्खिवए जं जहिं जहा अंगं ।*
*एयं पाओवगमं सनिहारिं वा अनीहारिं ।।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. निश्चलो निष्प्रतिकर्मा निक्षिपति यद् यत्र यथाङ्गम्।
एतत्पादपोपगमनं सनिर्हारिं वाऽनिर्हारम् ॥

मू. (५२८) *पाओवगमं भणियं समविसमे पायवुव्व जह पडिओ।*
*नवरं परप्पओगा कंपिज्ज जहा फलतरुव्व ॥*

छा. पादपोपगमनं भणितं समविषमे पादप इव यथा पतितः।
नवरं परप्रयोगात्कम्पेत यथा फलतरुरिव ॥

मू. (५२९) *तसपाणबीयरहिए विच्छिन्नवियारथंडिलविसुद्धे।*
*एगंते निद्दोसे उविंति अब्भुज्जयं मरणं ॥*

छा. त्रसप्राणबीजरहिते विस्तीर्णे विचारस्थण्डिले विशुद्धे।
एकान्ते निर्दोषे उपयान्त्यभ्युद्यतं मरणम् ॥

मू. (५३०) *पुव्वभवियवेरेणं देवो साहरइ कोऽवि पायाले।*
*मा सो चरिमसरीरो न वेअणं किंचि पाविज्जा ॥*

छा. पूर्वभविकवैरेण देवः संहरति कोऽपि पाताले।
मा स चरमशरीरो न वेदनां काञ्चित् प्राप्नुयात् ॥

मू. (५३१) *उप्पन्ने उवसग्गे दिव्वे माणुस्सए तिरिक्खे अ।*
*सव्वे पराजिणित्ता पाओवगया पविहरंति ॥*

छा. उत्पन्नानुपसर्गान् दिव्यान् मानुष्यकांश्च तैरश्चान्।
सर्वान् पराजित्य पादपोपगताः प्रविहरन्ति ॥

मू. (५३२) *जह नाम जसी कोसा अन्नो कोसो असीवि खलु अन्नो।*
*इय मे अन्नो जीवो अन्नो देहुत्ति मन्निज्जा ॥*

छा. यथा नाम असि कोशादन्यः कोशोऽसेरपि खल्वन्यः।
एवं ममान्यो जीवोऽन्यो देह इति मन्वीत ॥

मू. (५३३) *पुव्वावरदाहिणउत्तरेण वाएहिं आवडंतेहिं।*
*जह नवि कंपइ मेरू तह झाणाओ नवि चलंति ॥*

छा. पूर्वापरदक्षिणोत्तरत्यैर्वातैरापतद्भिर्यथा नैव
कम्पते मेरु तथा ध्यानान्नैव चलन्ति ॥

मू. (५३४) *पढमम्मि य संघयणे वट्टंते सेलकुड्डसामाणे।*
*तेसिंपिय वुच्छेओ चउदसपुव्वीण वुच्छेए ॥*

छा. प्रथमे च संहनने वर्त्तमाने शैलकुड्यसमाने।
तथोरपि च विच्छेदश्चतुर्दशपूर्विणां विच्छेदे ॥

मू. (५३५) *पुढविदगअगनिमारुयतरुमाइ तसेसु कोइ साहरइ।*
*वोसट्ठचत्तदेहो अहाउअं तं परिक्खिज्जा ॥*

छा. पृथ्वीदकाग्निमारुततवर्वादिषु त्रसेषु च कोऽपि संहरति।
व्युत्सृष्टत्यक्तदेहो यथायुष्कं तत्परी (त्प्रती) क्षेत ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (५३६) *देवो नेहेण नए देवागमणं च इंदगमणं वा।*
*जहियं इड्डी कंता सव्वसुहा हुंति सुहभावा ॥*

छा. देवः स्नेहेन नयेत् देवागमनं चेन्द्रागमनं वा।
यत्र ऋद्धि कान्ता सर्वसुखा भवन्ति शुभभावाः ॥

मू. (५३७) *उवसग्गे तिविहेवि य अनुकूले चेव तह य पडिकूले।*
*सम्मं अहियासंतो कम्मक्खयकारओ होइ ॥*

छा. उपसर्गास्त्रिविधानपि चानुकूलांश्चैव तथैव प्रतिकूलान्।
सम्यग् अध्यासयन् कर्मक्षयकारको भवति ॥

मू. (५३८) *एयं पाओवगमं इंगिणि पडिकम्म वण्णियं सुत्ते।*
*तित्थयरगणहरेहि य साहूहि य सेवियमुयारं ॥*

छा. एतत्पादपोपगनेङ्गिनी परिकर्म वर्णितं सूतरे।
तीर्थकरगणधरैश्च साधुभिश्च सेवितमुदारम् ॥

मू. (५३९) *सव्वे सव्वद्धाए सव्वन्नू सव्वकम्मभूमीसु।*
*सव्वगुरू सव्वहिया सव्वे मेरूसु अहिसित्ता ॥*

छा. सर्वे सर्वाद्धायां सर्वज्ञाः सर्वकर्मभूमिषु।
सर्वगुरवः सर्वहिताः सर्वे मेरुष्वभिषिक्ताः ॥

मू. (५४०) *सव्वाहिवि लद्धीहिं सव्वेऽवि परीसहे पराइत्ता।*
*सव्वेऽविय तित्थयरा पाओवगयाउ सिद्धिगया ॥*

छा. सर्वाभिरपि लब्धिभिर्युताः सर्वानपि परीषहान् पराजित्य।
सर्वेऽपि च तीर्थकराः पादपोपगता एव सिद्धिगताः ॥

मू. (५४१) *अवसेसा अणगारा तीयपडुप्पन्नऽणागया सव्वे।*
*केई पाओवगया पच्चक्खाणिंगिणिं केई ॥*

छा. अवशेषा अनगारा अतीतप्रत्युत्पन्नानागताः सर्वे।
केचित्पादपोपगताः इङ्गिनीमरणेन प्रत्याख्यानेन च केचित् ॥

मू. (५४२) *सव्वावि अ अज्जाओ सव्वेऽवि य पढमसंघयणवज्जा।*
*सव्वे य देसविरया पच्चक्खाणेण य मरंति ॥*

छा. सर्वा अपि चार्या सर्वेऽपि च प्रथमसंहननवर्जा।
सर्वे च देशविरताः प्रत्याख्यानेनैव म्रियन्ते ॥

मू. (५४३) *सव्वसुहप्पभवाओ जीवियसाराओ सव्वजणिगाओ।*
*आहाराओ रयणं न विज्जए उत्तमं लोए ॥*

छा. सर्वसुखप्रभवात् जीवितसारात्सर्व(व्यापार)जनकात्।
आहारात् उत्तमं रत्नं लोके न विद्यते ॥

मू. (५४४) *विग्गहगए य सिद्धे मुत्तुं लोगम्मि जंमिया जीवा।*
*सव्वे सव्वावत्थं आहारे हुंति आउत्ता ॥*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. विग्रहगतान् सिद्धांश्च मुक्त्वा लोके यावन्तो जीवास्ते ।
सर्वे सर्वावस्थासु आहारे आयुक्ता भवन्ति ॥

मू. (५४५) *तं तारिसगं रयणं सारं जं सव्वलोयरयणाणं ।*
*सव्वं परिचइत्ता पाओवगया पविहरंति ॥*

छा. तत्तादृशं रत्नं सारं यत्सर्वलोकरत्नानाम् ।
सर्वं परित्यज्य पादपोपगताः प्रविहरन्ति ॥

मू. (५४६) *एयं पाओवगमं निप्पडिकम्मं जिणेहिं पन्नत्तं ।*
*तं सोऊणं खमओ ववसायपरक्कमं कुणइ ॥*

छा. एतत् पादपोपगमं निष्प्रतिकर्म जिनैः प्रज्ञप्तम् ।
तच्छ्रुत्वा क्षपको व्यवसायपराक्रमं करोति ॥

मू. (५४७) *धीरपुरिसपन्नत्ते सप्पुरिसनिसेविए परमरम्मे ।*
*धन्ना सिलायलगया निरावयक्खा निवज्जंति ॥*

छा. धीरपुरुषप्रज्ञप्तान् सत्पुरुषनिषेवितान् परमरम्यान् (भावान्) ।
धन्याः शिलातलगता निरपेक्षाः प्रपद्यन्ते ॥

मू. (५४८) *सुव्वंति य अनगारा घोरासु भयाणियासु अडवीसुं ।*
*गिरिकुहरकंदरासु य विजणेसु य रुक्खहेट्ठेसुं ॥*

छा. श्रूयन्ते चानगाराः घोरासु भयानकास्वटवीषु ।
गिरिकुहरकन्दरासु च विजनेषु च वृक्षाणामधस्तात् ॥

मू. (५४९) *धीधणियबद्धकच्छा भीया जरमरणजम्मणसयाणं ।*
*सेलसिलासयण्था साहंति उ उत्तमट्ठाइं ॥*

छा. धृतिबाढबद्धकक्षा भीता जरामरणजन्मशतेभ्यः ।
शैलशिलाशयनस्थाः साधयन्त्येवोत्तमार्थम् ॥

मू. (५५०) *दीवोदहिरण्णेसु य खयरावहियासु पुनरविय तासु ।*
*कमलसिरीमहिलादिसु भत्तपरिन्ना कया थीसु ॥*

छा. द्वीपोदध्यरण्येषु च खेचरापहृताभिः पुनरपि च ।
तासु कमलश्रीमहिलादिभिर्भक्तपरिज्ञा कृता स्त्रीषु ॥

मू. (५५१) *जइ ताव सावयाकुलगिरिकंदरविसमकडगदुग्गासुं ।*
*साहिंति उत्तमट्ठं धिइधनियसहायगा धीरा ॥*

छा. यदि तावत् श्वापदाकुलगिरिकन्दरविषमकटकदुर्गासु
साधयन्त्युत्तमार्थं बाढं धृतिसहायका धीराः ॥

मू. (५५२) *किं पुण अनगारसहायगेण अन्नुन्नसंगहबलेणं ।*
*परलोए य न सक्का साहेउं अप्पणो अट्ठं ॥*

छा. किं पुनरनगारसहायकेनान्योन्यसंग्रहबलेन ।
परलोकाय च न शक्यः साधुयितुमात्मनोऽर्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (५५३) *समुइन्नेसु अ सुविहिय ! उवसग्गमहब्भएसु विविहेसुं ।*
*हियएण चिंतणिज्जं रयणनिही एस उवसग्गो ॥*

छा. समुदीर्णेषु च सुविहित ! उपसर्गमहाभयेषु विविधेषु ।
हृदयेन चिन्तनीयं रत्ननिधिरेष उपसर्गः ॥

मू. (५५४) *किं जायं जइ मरणं अहं च एगाणिओ इहं पाणी ।*
*वसिओऽहं तिरियत्ते बहुसो एगागिओ रन्ने ॥*

छा. किं जातं यदि मरणं अहं चैकाकीह प्राणी ।
उषितोऽहं तिर्यक्त्वे बहुश एकाक्यरण्ये ॥

मू. (५५५) *वसिऊणऽवि जणमज्झे वच्चइ एगागिओ इमो जीवो ।*
*मुत्तूण सरीरघरं मच्चुमुहाकड्डिओ संतो ॥*

छा. उषित्वाऽपि जनमध्ये व्रजत्येकाक्ययं जीवः ।
मुक्त्वा शरीरगृहं मृत्युमुखाकर्षितः सन् ॥

मू. (५५६) *जह बीहंति अ जीवि विविहाण विहासियाण एगागी ।*
*तह संसारगएहिं जीवेहिं विहेसिया अन्ने ॥*

छा. यथा बिभ्यति च जीवा विविधेभ्यो विभीषिकाभ्य एकाकिनः ।
तथा संसारगतैर्जीवैर्बिभीषिका अन्याः ॥

मू. (५५७) *सावयभयाभिभूओ बहूसु अडवीसु निरभिरामास ।*
*सुरहिहरिणमहिससूयरकरवोडियरुक्खछायासु ॥*

छा. श्वापदभयाभिभूतो बहुष्वटवीषु निरभिरामासु ।
रथिक(सुरभि)हरिणमहिषशूकरखण्डितवृक्षच्छायासु ॥

मू. (५५८) *गयगवयखग्गगंडयवग्घतरच्छच्छभल्लचरियासु ।*
*भल्लुंकिकंकदीवियसंचरसब्भावकिण्णासुं ॥*

छा. गजगवयखड्गिगण्डकव्याघ्रतरक्षाच्छबल्लचरितासु ।
श्रृगालकङ्कद्वीपिकसद्भावसंचारकीर्णासु ॥

मू. (५५९) *मत्तगइंदनिवाडियभिल्लपुलिंदावकुंडियवणासुं ।*
*वसिओऽहं तिरियत्ते भीसणसंसारचारम्मि ॥*

छा. मत्तगजेन्द्रनिपातितबिल्लपुलिन्द्रावकुण्टितवनासु (अटवीषु) ।
उषितोऽहं तिर्यक्त्वे भीषणे संसारचारके ॥

मू. (५६०) *कत्थ य मुद्धमिगत्ते बहुसो अडवीसु पयइविसमासु ।*
*वग्घमुहावडिएणं रसियं अइभीयहियएणं ॥*

छा. क्वचित् मुग्धमृगत्वे बहुशोऽटवीषु प्रकृतिविषमासु ।
व्याघ्रमुखापतितेन रसितमतिभीतहृदयेन ॥

मू. (५६१) *कत्थइ अइदुप्पिक्खो भीसणविगरालघोरवयणोऽहं ।*
*आसि महंविय वग्घो रुरुमहिसवराहविद्दवओ ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. क्वचिदतितुष्प्रेक्ष्यो भीषणविकरालघोरवदनोऽहम्।
आसं महानपि च व्याघ्रो रुरुमहिषवराहविद्रावकः ॥

मू. (५६२) *कत्थइ दुव्विहिएहिं रक्खसवेयालभूयरूवेहिं।*
*छलिओ वहिओ य अहं मणुस्सजम्मम्मि निस्सारो ॥*

छा. क्वचिद्दुर्विहितै राक्षसवैतालभूतरूपैश्छलितो हतश्चाहं मनुष्यजन्मनि निसारः ॥

मू. (५६३) *पयइकुडिलम्मि कत्थइ संसारे पाविऊण भूयत्तं।*
*बहुसो उव्वियमाणो मएवि बीहाविया सत्ता ॥*

छा. प्रकृतिकुटिले क्वचित्संसारे प्राप्य भूतत्वं बहुश
उद्विजन् मयाऽपि भापिताः सत्वाः ॥

मू. (५६४) *विरसं आरसमाणो कत्थइ रन्नेसु घाइओ अहयं।*
*सावयगहणम्मि वणे भयभीरू खुभियचित्तोऽहं ॥*

छा. विरसमारसन् क्वचिदरण्येषु घातितोऽहम्।
श्वापदगहने वने भयभीरु क्षुब्धचित्तोऽहम् ॥

मू. (५६५) *पत्तं विचित्तविरसं दुक्खं संसारसागरगएणं।*
*रसियं च असरणेणं कयंतदंतंतरगएणं ॥*

छा. प्राप्तं विचित्रविरसं दुःखं संसारसागरगतेन।
रसितं चाशरणेन कृतान्तदन्तान्तर्गतेन ॥

मू. (५६६) *तइया कीस न हायइ जीवो जइया सुसाणपरिविद्धं।*
*भल्लुंकिकंकवायससएसु ढोकिज्जए देहं ॥*

छा. तदा कथं न हीयते जीवो यदा श्मशानपरिविद्धः।
श्रृगालकङ्कवायसशतेषु अढौक्यत देहः ॥

मू. (५६७) *ता तं निज्जिणिऊणं देहं मुत्तूण वच्चए जीवो।*
*सो जीवो अविनासी भणिओ तेलुक्कदंसीहिं ॥*

छा. तत्तं निर्जित्य देहं मुक्त्वा व्रजति जीवः स
जीवोऽविनासी भणितस्त्रैलोक्यदर्शिभिः ॥

मू. (५६८) *तं जइ ताव न मुच्चइ जीवो मरणस्स उव्वियंतोऽवि।*
*तम्हा मज्झ न जुज्जइ दाऊण भयस्स अप्पाणं ॥*

छा. तद् यदि तावन्न मुच्यते जीवो मरणादुद्विजन्नपि।
तस्मान्मम न युज्यते दातुं भयायात्मानम् ॥

मू. (५६९) *एवमनुचिंतयंता सुविहिय! जरमरणभावियमईया।*
*पावंति कयपयत्ता मरणसमाहिं महाभागा ॥*

छा. एवमनुचिन्तयन्तः सुविहित! जरामरणभावितमतिकाः।
प्राप्नुवन्ति कृतप्रतिज्ञा मरणसमाधिं महाभागाः ॥

मू. (५७०) *एवं भावियचित्तो संथारवरंमि सुविहिय! सयावि।*
*भावेहि भावणाओ बारस जिनवयणदिट्ठाओ ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. एवं भावितचित्ताः संस्तारकवरे सुविहित !
सदैव भावय भावना द्वादश जिनवचनदृष्टाः ॥

मू. (५७१) *इह इत्तो चउरंगे चउत्थमग्गं (मंगं) सुसाहुधम्मम्मि ।*
*वन्नेइ भावणाओ बारसिमो बारसंगविऊ ॥*

छा. इहेतश्चतुरङ्गे चतुर्थमार्गं सुसाधुधर्मे ।
वर्णयति भावन द्वादशायं द्वादशाङ्गवित् ॥

मू. (५७२) *समणेण सावएण य जाओ निच्चंपि भावणिज्जाओ ।*
*दढसंवेगकरीओ विसेसओ उत्तमट्ठम्मि ॥*

छा. श्रमणेन श्रावकेण च या नित्यमपि भावनीयाः ।
दृढसंवेगकारिण्यो विशेषत उत्तमार्थे ॥

मू. (५७३) *पढमं अनिच्चभावं असरणयं एगयं च अन्नत्तं ।*
*संसारमसुभयाविय विविहं लोगस्सहावं च ॥*

छा. प्रथममनित्यभावमशरणतामेकतां चान्यत्वम् ।
संसारमशुभतामपि च विविधं लोकस्वभावं च ॥

मू. (५७४) *कम्मस्स आसवं संवरं च निज्जरणमुत्तमे य गुणे ।*
*जिनसासणम्मि बोहिं च दुल्लहं चिंतए मइमं ॥*

छा. कर्मण आश्रवं संवरं च निर्जरणमुत्तमांश्च गुणान् ।
जिनशासने बोधिं च दुर्लभां चिन्तयेन्मतिमान् ॥

मू. (५७५) *सव्वट्ठाणाइं असासयाइं इह चेव देवलोगे य ।*
*सुरअसुरनराईणं रिद्धिविसेसा सुहाइं वा ॥*

छा. सर्वस्थानान्यशाश्वतानि इहापि देवलोके च ।
सुरासुरनरादीनां ऋद्धिविशेषाः सुखानि च ॥

मू. (५७६) *मायापिईहिं सहवड्ढिएहिं मित्तेहिं पुत्तदारेहिं ।*
*एगयओ सहवासो पीई पणओऽविअ अनिच्चो ॥*

छा. मातापितृभिः सहवर्द्धितैर्मित्रैः पुत्रदारैः ।
एकतः सहवासः प्रीति प्रणयोऽपि चानित्यः ॥

मू. (५७७) *भवणेहिं व वणेहि य सयणासणजाणवाहणाईहिं ।*
*संजोगोऽवि अनिच्चो तह परलोगेहिं सह तेहिं ॥*

छा. भवनैर्वा वनैश्च शयनासनयानवाहनादिभिः ।
संयोगोऽप्यनित्यस्तथा परलोकेऽपि सह तैः ॥

मू. (५७८) *बलवीरियरूवजोव्वणसामग्गीसुभगया वपूसोभा ।*
*देहस्स य आरुग्गं असासयं जीवियं चेव ॥*

छा. बलवीर्यरूपयौवनसामग्रीसुभगताः वपुःशोभा ।
देहस्य चारोग्यमशाश्वतं जीवितं चैव ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (५७९) *जम्मजरामरणभए अभिदुए विविहवाहिसंतत्ते ।*
*लोगम्मि नत्थि सरणं जिणिंदवरसासणं मुत्तुं ॥*

छा. जन्मजरामरणभयैरभिद्रुते विविधव्याधिसंतप्ते
लोके नास्ति शरणं जिनेन्द्रवरशासनं मुक्त्वा ॥

मू. (५८०) *आसेहि य हत्थीहि य पव्वयमित्तेहिं निच्चमित्तेहिं ।*
*सावरणपहरणेहि य बलवयमत्तेहिं जोहेहिं ॥*

छा. अश्वैश्च हस्तिभिश्च पर्वमित्रैर्नित्यमित्रैः ।
सावरणप्रहरणैश्च बलवयोमत्तैर्योधैः ॥

मू. (५८१) *महया भडचडगरपहकरेण अधि चक्कवट्टिणा मच्चू ।*
*न य जियपुव्वो केणइ नीइबलेणावि लोगम्मि ॥*

छा. महत्ता भटवृन्दसमूहेनापि चक्रवर्त्तिना मृत्यु ।
न च जितपूर्व केनापि नीतिबलेनापि लोके ॥

मू. (५८२) *विविहेहि मंगलहि य विज्जामंतोसहीपओगेहिं ।*
*नविसक्का तारेउं मरणा नवि रुण्णसोएहिं ॥*

छा. विविधैर्मङ्गलैश्च विद्यामन्त्रौषधिप्रयोगैश्च
नैव शक्यस्तारयितुं मरणान्नैव च रुग्णश्रोतोभ्यः ॥

मू. (५८३) *पुत्ता मित्ता य पिया सयणो बंधवजणो अ अत्थो य ।*
*न समत्था ताएउं मरणा सिंदावि देवगणा ॥*

छा. पुत्राः मित्राणि च पिता स्वजनो बान्धवजनोऽर्थश्च ।
न समर्थास्त्रातुं मरणात्सेन्द्रा अपि देवगणाः ॥

मू. (५८४) *सयणस्स य मज्झगओ रोगाभिहओ किलिस्सइ इहेगो ।*
*सयणऽविय से रोगं न विरिंचइ नेव नासेइ ॥*

छा. स्वजनस्यापि मध्यगतो रोगाभिहतः क्लिश्यते इहैकः ।
स्वजनोऽपि च तस्य रोगं न विभजति नैव नाशयति ॥

मू. (५८५) *मज्झम्मि बंधवाणं इक्को मरइ कलुणरुयंताणं ।*
*न य णं अन्नेति तओ बंधुजणो नेव दाराइं ॥*

छा. बान्धवनां मध्ये एको म्रियते करुणं रुदताम् ।
न चैनमन्वेति सको बन्धुजनो नैव च दाराः ॥

मू. (५८६) *इक्को करेइ कम्मं फलमवि तस्सेक्कओ समनुहवइ ।*
*इक्को जायइ मरइ य परलोअं इक्कओ जाई ॥*

छा. एकः करोति कर्म फलमपि तस्यैककः समनुभवति ।
एको जायते म्रियते च परलोकमेकको याति ॥

मू. (५८७) *पत्तेयं पत्तेयं नियगं कम्मफलमणुहवंताणं ।*
*को कस्स जए सयणो ? को कस्स व परजणो भणिओ ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. प्रत्येकं २ निजकं कर्मफलमनुभवतां कः कस्य
जगति स्वजनः ? को वा कस्य परजनो भणितः ।।

मू. (५८८) *को केण समं जायइ को केण समं च परभवं जाई ।*
*को वा करेइ किंची कस्स व को कं नियत्तेइ ।।*

छा. कः केन समं जायते ? कः केन समं च परभवं याति ? ।
को वा करोति किञ्चित् ? कस्यापि च कः कं निवर्त्तयति ।।

मू. (५८९) *अनुसोअइ अन्नजणं अन्नभवंतरगयं तु बालजणो ।*
*नवि सोयइ अप्पाणं किलिस्समाणं भवसमुद्दे ।।*

छा. अनुशोचत्यन्यजनमन्यभवान्तरगतं तु बालजनः ।
नैव शोचन्त्यात्मानं क्लिश्यन्तं भवसमुद्रे ।।

मू. (५९०) *अन्नं इमं सरीरं अन्नोऽहं बंधवाविमे अन्ने ।*
*एवं नाऊण खमं कुसलस्स न तं खमं काउं ।।*

छा. अन्यदिदं शरीरं अन्योऽहं बान्धवा अपीमेऽन्ये ।
एवं क्षमं ज्ञात्वा कुशलस्य तत्कर्त्तु क्षमं न ।।

मू. (५९१) *हा ! जह मोहियमइणा सुग्गइमग्गं अजाणमाणेणं ।*
*भीमे भवकंतारे सुचिरं भमियं भयकरम्मि ।।*

छा. हा ! यथा मोहितमतिना सुगतिमार्गमजानता ।
भीमे भवकान्तारे सुचिरं भ्रान्तं भयङ्करे ।।

मू. (५९२) *जोणिसयसहस्सेसु य असइं जायं मयं वऽनेगासु ।*
*संजोगविप्पओगा पत्ता दुक्खाणि य बहूणि ।।*

छा. योनिशतसहस्रेषु चासकृत् जातं मृतं वाऽनेकासु जातिषु ।
संयोगविप्रयोगाः प्राप्ता दुःखानि च बहूनि ।।

मू. (५९३) *सग्गेसु य नरगेसु य माणुस्से तह तिरिक्खजोणीसुं ।*
*जायं मयं च बहुसो संसारे संसारे संसरंतेणं ।।*

छा. स्वर्गेषु च नरकेषु च मानुष्ये तथा तिर्यग्योनिषु ।
जातं मृतं च बहुशः संसारे संसरता ।।

मू. (५९४) *निब्भत्थणावमाणणवहबंधणरुंधणा धनविनासो ।*
*नेगा य रोगसोगा पत्ता जाईसहस्सेसुं ।।*

छा. निर्भर्त्सनाऽमाननवधबन्धनरोधा धनविनाशः ।
अनेके च रोगशोकाः प्राप्ता जातिसहस्रेषु ।।

मू. (५९५) *सो नत्थि इहोगासो लोए वालग्गकोडिमित्तोऽवि ।।*
*जम्मणमरणाबाहा अनेगसो जत्थ न य पत्ता ।।*

छा. स नास्तीहावकाशो लोके वालाग्रकोटिमात्रोऽपि ।
जन्मरणाबाधा अनेकशो यत्र न प्राप्ताः ।।

मू. (५९६) *सव्वाणि सव्वलोए रूवी दव्वाणि पत्तपुव्वाणि ।*
*देहोवक्खरपरिभोगयाइ दुक्खेसु य बहूसुं ।।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. सर्वाणि सर्वलोके रूपिद्रव्याणि प्राप्तपूर्वाणि ।
देहोपस्करपरिभोगतया दुःखेषु च बहुषु ॥

मू. (५९७) *संबंधिबंधवत्ते सव्वे जीवा अनेगसो मज्झं ।*
*विविहवहवेरजणया दासा सामी य मे आसी ॥*

छा. सम्बन्धिबान्धवत्वे सर्वे जीवा अनेकशो मम ।
विविधवधवैरजनका दासाः स्वामिनश्च मे आसन् ॥

मू. (५९८) *लोगसहावो धी धी जत्थ व माया मया हवइ धूया ।*
*पुत्तोऽवि य होइ पिया पियावि पुत्तत्तणमुवेइ ॥*

छा. लोकस्वभावं धिग् धिग् यत्र च माता मृता भवति दुहिता ।
पुत्रोऽपि च भवति पिता पिताऽपि पुत्रत्वमुपयाति ॥

मू. (५९९) *जत्थ पियपुत्तगस्सवि माया छाया भवंतरगयस्स ।*
*तुट्ठा खायइ मंसं इत्तो किं कट्ठयरमन्नं ॥*

छा. यत्र प्रियपुत्रस्यापि माता छायया भवान्तरगतस्य ।
तुष्टा खादति मांसं किमितोऽन्यत्कष्टकरम् ? ॥

मू. (६००) *धी संसारो जहियं जुवाणओ परमरूवगव्वियओ ।*
*मरिऊण जायइ किमी तत्थेव कलेवरे नियए ॥*

छा. धिक् संसारं यत्र युवा परमरूपवगर्वितः ।
मृत्वा जायते कृमिस्तत्रैव कलेवरे निजके ॥

मू. (६०१) *बहुसो अनुभूयाइं अईयकालम्मि सव्वदुक्खाइं ।*
*पाविहिइ पुणो दुक्खं न करेहिइ जो जणो धम्मं ॥*

छा. बहुशोऽनुभूतान्यतीतकाले सर्वदुःखानि ।
प्राप्स्यति पुनर्दुखं न करिष्यति यो जनो धर्मम् ॥

मू. (६०२) *धम्मेण विना जिनदेसिएण नन्नत्थ अत्थि किंचि सुहं ।*
*ठाणं वा कज्जं वा सदेवमणुयासुरे लोए ॥*

छा. धर्मेण विना जिनदेशितेन नान्यत्रास्ति किञ्चित्सुखम् ।
स्थानं वा कार्यं वा सदेवमनुजासुरे लोके ॥

मू. (६०३) *अत्थं धम्मं कामं जाणि य कज्जाणि तिन्नि मिच्छंति ।*
*जं तत्थ धम्मकज्जं तं सुभमियराणि असुभाणि ॥*

छा. अर्थं धर्मं कामं यानि च कार्याणि त्रीणि इच्छन्ति ।
यत्तत्र धर्मकार्यं तच्छुभमितरे अशुभे ॥

मू. (६०४) *आयासकिलेसाणं वेराणं सागरो भयकरो य ।*
*बहुदुक्खदुग्गइकरो अत्थो मूलं अनत्थाणं ॥*

छा. आयासक्लेशानां वैराणामाकरो भयंकरश्च ।
बहुदुःखदुर्गतिकरो मूलमर्थोऽनर्थानाम् ॥

मू. (६०५) *किच्छाहि पाविउं जे पत्ता बहुभयकिलेसदोसकरा ।*
*तक्खणसुहा बहुदुहा संसारविवद्धणा कामा ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. कृच्छ्रैः प्राप्तुं न् (शक्यं) ये च प्राप्ता बहुभयक्लेशदोषकराः ।
तत्क्षणसुखा बहुदुःखाः संसारविवर्द्धनाः कामाः ॥

मू. (६०६) *नत्थि इहं संसारे ठाणं किंचिवि निरुवद्दुयं नाम ।*
*ससुरासुरेसु मणुए नरएसु तिरिक्खजोणीसुं ॥*

छा. नास्तीह संसारे स्थानं किञ्चिदपि निरुपद्रुतं नाम ।
ससुरासुरेषु मनुजेषु नरकेषु तिर्यगयोनिषु च ॥

मू. (६०७) *बहुदुक्खपीलियाणं मइमूढाणं अणप्पवसगाणं ।*
*तिरियाणं नत्थि सुहं नेरइयाणं कओ चेव ॥*

छा. बहुदुःखपीडितानां मतिमूढानामनात्मवशानाम् ।
तिरश्चां नास्ति सुखं नैरयिकाणां कुतश्चैव ॥

मू. (६०८) *हयगब्भवास जम्मणवाहिजरामरणरोगसोगेहिं ।*
*अभिभूए माणुस्से बहुदोसेहिं न सुहमत्थि ॥*

छा. हतगर्भवासजन्मव्याधिजरामरणरोगशोकैः ।
अभिभूते मानुष्ये बहुदोषैर्न सुखमस्ति ॥

मू. (६०९) *मंसट्ठियसंघाए मुत्तपुरीसभरिए नवच्छिद्दे ।*
*असुइं परिस्सवंते सुहं सरीरम्मि किं अत्थि ॥*

छा. मांसास्थिसंघाते मूत्रपुरीषभृते नवच्छिद्रे ।
अशुचि परिश्रवति शुभं शरीरे किमस्ति ॥

मू. (६१०) *इट्ठजनविप्पओगो चेवणभयं चव देवलोगाओ ।*
*एयारिसाणि सग्गे देवावि दुहाणि पाविंति ॥*

छा. इष्टजनविप्रयोगश्चयवनभयं चैव देवलोकात् ।
एतादृतानि स्वर्गे देवा अपि दुःखानि प्राप्नुवन्ति ॥

मू. (६११) *ईसाविसायमकोहलोहदोसेहिं एवमाईहिं ।*
*देवावि समभिभूया तेसुवि य कओ सुहं अत्थि ॥*

छा. ईष्यार्विषादमदक्रोधलोभैर्दोषैरेवमादिभिः ।
देवा अपि च समभिभूतास्तेष्वपि च कुतः सुखमस्ति ॥

मू. (६१२) *एरिसयदोसपुण्णे खुत्तो संसारसायरे जीवो ।*
*जं अइचिरं किलिस्सइ तं आसवहेउअं सव्वं ॥*

छा. ईदृगदोषपूर्णे मग्नः संसारसागरे जीवः ।
यदतिचिरं क्लिश्यति तदाश्रवहेतुकं सर्वम् ॥

मू. (६१३) *रागद्दोसपमत्तो इंदियवसओ करेइ कम्माइं ।*
*आसवदारेहिं अविगुहेहिं तिविहेण करणेणं ॥*

छा. रागद्वेषप्रमत्त इन्द्रियवरागः करोति कर्माणि ।
आश्रवद्वारैरविगूहितैस्त्रिविधेन करणेन ॥

मू. (६१४) *धिधी मोहो जेणिह हियकामो खलु स पावमायरइ ।*
*न हु पावं हवइ हियं विसं जहा जीवियत्थिस्स ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छा. धिग् धिग् मोहं येनेह हितकामः खलु स पापमाचरति ।
नैव पापं भवति हितं विषं यथा जीवितार्थिनः ॥

मू. (६९५) *रागस्स य दोसस्स य धिरत्थु जं नाम सद्दहंतोऽवि ।*
*पावेसु कुणइ भावं आउरविज्जव्व अहिएसुं ॥*

छा. रागं च द्वेषं च धिगस्तु यन्नाम श्रद्दधानोऽपि ।
पापेषु करोति भावमातुरवैद्य इवाहितेषु ॥

मू. (६९६) *लोभेण अहव धत्थो कज्जं न गणेइ आयअहियंपि ।*
*अइलोहेण विनस्सइ मच्छुव्व जहा गलं गिलिओ ॥*

छा. लोभेनाथवा ग्रस्तः कार्यं न गणयति आत्माहितमपि ।
अतिलोभेन विनश्यति मत्स्य इव यथा गलं गिलितः ॥

मू. (६९७) *अत्थं धम्मं कामं तिन्निविबुद्धो जनो परिच्चयइ ।*
*ताइं करेइ जेहि उ (न) किलिस्सइ इहं परभवे य ॥*

छा. अर्थं धर्मं कामं त्रीनपि बुधो जनः परित्यजति ।
तानि करोति यैस्तु (न) क्लिश्यतीह परभवे च ॥

मू. (६९८) *हुंति अजुत्तस्स विनासगाणि पंचिंदियाणि पुरिसस्स ।*
*उरगा इव उग्गविसा गहिया मंतोसहीहि विना ॥*

छा. भवन्त्ययुक्तस्य विनाशकानि पञ्चेन्द्रियाणि पुरुषस्य ।
उरगा इवोग्रविषाः मन्त्रौषधिभिर्विना गृहीताः ॥

मू. (६९९) *आसवदारेहिं सया हिंसाईएहिं कम्ममासवइ ।*
*जह नावाइ विणासो छिद्देहि जलं उयहिमज्झे ॥*

छा. आश्रवद्वारैः सदा हिंसादिकैः कर्माश्रवति ।
यथा नावो विनाशश्छिद्रैरुदधिमध्ये जलमाश्रवन्त्याः (तथाऽऽश्रवैर्जीवस्य) ॥

मू. (६२०) *कम्मासवदाराइं निरुंभियव्वाइं इंदियाइं च ।*
